**T. No. 120** a & B

a) नागप्रतिष्ठा - Nāgapratiṣṭhā.

b) रौरवागमपद्धतिः Rauravāgamapaddhatiḥ.

Copied from a ms belonging to [illegible] Swaminathgurukkal, [illegible], Madras-4.

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

T No. 120 a and b

(a) Transcript of MS. of Swaminatha Sivacharya of Mylapore

श्री.

# नागप्रतिष्ठाविषयानुक्रमणी ॥


a)

1 अनुज्ञा no page no. given.

3 आचार्यादिऋत्विग्वरणम् 10

2 संकल्पः 1-10

4 बुद्धिपूर्वसर्पवधशान्तिः 12

5 आचार्यर्त्विजां वेदपारायणं 15

6 मृत्संग्रहणम् 16

7 नेत्रोन्मीलनम् "

8 जलाधिवासः "

9 रक्षाबन्धः 17

10 शयनम् "

11 यागशालानिर्माणम् 18

12 कलशस्थापनम् "

13 दाननागप्रमाणम् 19

14 सूर्यपूजा "

15 द्वारदेवतापूजा "

16 भूतशुद्धिः 21

17 वागीश्वरपूजा "

18 कलशपूजा 22

19 सुवर्णनागदानम् 23

20 अष्टनागध्यानम् 24

21 अग्निकार्यम् 26

22 होमः (पालाशादि) "

23 बिम्बशुद्धिः 28

24 तत्त्वत्रिखण्ड 29

25 शान्तिकुम्भः "

26 मूर्तीश्वरादिहोमः 30

27 प्राणप्रतिष्ठा (नागगायत्री) 31

28 कुम्भाभिषेक 33

29 अङ्गपूजा "

30 ऋत्विग्दाननागपूजा 32

31 दशदानम् 35

32 दम्पति, ब्रह्मचारिपूजा "

33 नागप्रतिष्ठाफलम् "

रौरवे नागप्रतिष्ठा समाप्ता 36

b) अथ रौरवागमपद्धति? नागप्रतिष्ठा

34 द्वारपूजा 37

35 भूतशुद्धिः 44

36 पञ्चशुद्धिः "

37 विशेषार्घ्यम् "

38 आत्मपूजा "

39 मण्टपसंस्कारः 45

40 दशायुधपूजा 48

41 ज्ञानखड्गसमर्पणम् 49

42 अष्टनागध्यानम् 53

43 वर्धनीपूजा 56

44 आवरणपूजा 58

45 अङ्गपूजा 61

46 होमः 71

47 कुम्भाभिषेक (त्रिखण्ड) 63

48 तत्त्वार्चना 65

49 कुम्भाभिषेकः 77

50 अन्नयुग्मकूच? तुर्यहोमः 79

~~रौरवे नागप्रतिष्ठा सप्तमः पटलः~~

51 सर्पसूक्तम् 80-81

52 कारणागमे नागप्रतिष्ठा नागप्रमाणम् 82

53 नागप्रतिष्ठाफलम् "

54 " " काल: 83

55 संकल्पः पुण्याहम् etc. "

56 मण्टपपूजा 84

57 कुम्भस्थापनम् 85

58 आवरणपूजा 86

59 जलस्थापनकुम्भः "

60 होमः (नागप्रतिष्ठा) 87

61 नागप्रतिष्ठास्थलम् 88

62 स्थापनं, अष्टबन्धः आभिषेकः 89

63 आचार्यपूजा "


Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

T.No 120


64 दशदान . . . . . 90
65 समाप्तिः (नागप्रतिष्ठा-) "
66 संकल्पः ( " -) "

67 अमासोमवारव्रतम् 93-97

सिद्धान्तदीपिकायां नागप्रतिष्ठा
68 नागप्रतिष्ठाफलम् 98
69 " कालः 99
70 उपादानद्रव्याणि (शिलादि) 100
71 एक, द्विवक्त्रादिनागभेदः 101
72 नागनिर्माणदारूणि 102
73 नागनिर्माणलोहाः 103
74 नागप्रतिष्ठास्थलानि "
75 नागप्रतिष्ठामन्त्राः 104
76 आचार्यलक्षणम् 105
77 स्वार्थ-परार्थनागपूजा "
78 यागशाला . . . 106
79 कुण्डानि . . . 107
~~80 अङ्कुरार्पणवास्तुशान्ति 108~~
80 अङ्कुरार्पणवास्तुशान्ति 108
81 नेत्रोन्मीलनम् . . . "
82 बेरशुद्धि . . . . "
83 पञ्चामृतम् - - 109
84 शयनम् . . . . 111
85 कलशस्थापनम् 112
86 आवाहनादि . . . 114
87 अष्टनागपूजा . . . 115
88 नैवेद्यम् - - - 119
89 पुरुषसूक्तादिपारायण "
90 होमः - - - 120
91 द्वितीयेऽहनि कार्यम् 123
92 अभिषेकः . . . . 125
93 नैवेद्यम् . . . 126
94 दक्षिणा . . . . "
95 प्रतिष्ठाफलम् 127
96 नित्यपूजा - - 128
समाप्तिः



Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

a இந்தப் புத்தகத்தில் இருப்பு रौरवागमत्तिल् नागप्रतिष्ठै

नागशान्ति, संकल्पम्। सिद्धान्तदीपि கையில் नागप्रतिष्ठै।

कारणागमत्तिल् नागप्रतिष्ठै, संकल्पम्, मन्त्रभेदम्।

पुस्त...... विश्वनाथ गुरुक्कळ्।

b यथोक्त दक्षिणामिव स्वीकृत्य भारद्वाजगोत्रोद्भवस्य, कृत्तिका- नक्षत्रे मेष राशौ जातस्य ईश्वर देशिक शर्मण: आवयो: दम्पत्यो: पुरुष वंध्य स्त्रीवंध्य जन्मान्तर सर्पवध दोष निवारणार्थं, आयुष्याभिवृद्ध्यर्थं आयुस्सत्स्वरूप सुगुणानेन बहु सुपुत्र प्राप्त्यर्थं नागप्रतिष्ठारम्भ कर्मकर्तुं अधिकार योग्य- ता सिद्धिरस्तु इति भवाननुगृह्णातु। अधिकारयोग्यता सिद्धिरस्तु।

~~~x~~~

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.
~~~

Copied from the manuscript of NĀGAPRATIṢṬHA

(originally of Tiruvalangadu and now) belonging to Swaminatha Sivacharya, MYLAPORE, Madras-4

T. B. Seshadri.

13-9. 65

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

॥ श्रीः ॥

TNo 120

1

[शौरागम]

1.a

# शौरागमोक्त

## ॥ नागप्रतिष्ठा ॥

॥ संकल्पम् । मूलम् ॥

---

नागप्रतिष्ठाविधिं व्याख्यास्यामः। ओन्नमस्सत्रुसेत्यादि ब्राह्मणानुज्ञां प्राप्य विघ्नेश्वरं संपूज्य विशेषेण संकल्पय अस्य श्रीभगवतो महो पुरुषस्य अचिन्त्यापरिमितशक्त्या-हूयमाणस्य महाजलौघ[ध्य] मध्ये परिभ्रममणानैककोटि-ब्रह्माण्डानामेकतमे कव्यक्ताव्यक्त प्रकृति महदहंकार पृथिव्यप्तेजोवाय्वाकाशाद्यावरणैरावृते अस्मिन् म-हति ब्रह्माण्ड मण्डले आधार शक्ति वराह कूर्म अनन्ताद्यष्ट अष्टदिग्गजोपरि प्रतिष्ठिते अतल वितल सुतल रसातल तलातल महातल पाताल सप्तलोकानामुपरितले भूर्लोक

1b भुवर्लोक महर्लोक जनर्लोक तपोलोक सत्यलोका-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नामधोभागे, महानालायमान फणिराजशेषस्य

सहस्र फणाफणि मण्डल मण्डिते, ऐरावत पुण्डरीक

वामन कुमोदोञ्जन पुष्पदन्त सार्वभौम सुप्रतीका-

ख्याष्ट दिग्दन्ति शुण्डादण्डोंकोभिते, अमरावत्याशो-

कवति भोगवति नैववति गन्धर्ववति काञ्चीवति

अलकावति पुण्यपुरि विराजिते इन्द्राग्नियम नैऋति

वरुण वायु कुबेर ईशानाख्याष्टलोकपालिते, लोका-

लोक चलेन वलयते महेन्द्र मलय सह्य शुक्तिम-

2a ऋक्ष विन्ध्य पार्यात्राख्या सप्त कुलाचलैः परिवृते,

मतंग (ग्।) मतंग हिरण्य शृङ्गमाल्य व ...... ष्क .... त्येक

शृंगाख्य पञ्चमहानागैस्समधिष्ठिते। वलयाकार

लवणेक्षु सुरा सर्पि दधि क्षीर शुद्धोदकार्णवैः परिवृते,

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

जम्बु प्लक्ष शाल्मली कुश क्रौञ्च शाक पुष्करारव्य
सप्तद्वीपैः परिवृते, इन्द्रखण्ड श्वेतखण्ड तांम्र
खण्ड गभस्तिखण्ड नागखण्ड सौम्यखण्ड गान्धर्व-
खण्ड भरतखण्डाख्येति नवखण्डात्मिके। प्रत्येकं
नवसहस्रयोजनभारतादि विश्रुते किंपुरुष हरिला-
वृत ककुभ रौत्मक रमणक मन्दहरण कल्हारण
पाञ्चजन्यानिह दुर्लंकेति नवखण्ड मण्डिते, दण्डकरण्य
विन्ध्यारण्य चंपकारण्य नैमिशारण्य कामिकारण्य
बदरीकारण्य नहुषारण्य गुह्यारण्य देवकारण्यादि
26 दीशारण्यैर्विराजिते। भागीरथि गौतमि नर्मदा
यमुना सरस्वती कृष्णावेणी बाहुनादि भीमरथि
वेणुकामालापहारक कावेरी कृतमाला ताम्रपर्णि

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

विशाला वेत्रवति वेगवति विशोकवति कौशिका

गण्डकि प्रणता तुङ्गभद्रा चित्रका वसिष्टा प्रवरा

काश्यपि सर्वपापहरा कुशावति कुशावृतिका

पयोष्णिका वञ्जुला चर्मण्वति फल्गुनि करतोयादि

पुण्यनदीभिः परिवृते। अंगवंग कलिङ्ग कालिंग

काश्मीर काम्भोज कामरूप सौवीर सौराष्ट्र घुर्जु-

राष्ट्र मगध मालव नेपाल केरल चोल पाञ्चाल

3a सिंहल बंगाल गौल मलयाल द्राविड कर्णाट

वराट पाण्ड्य फुलिन्दु आन्ध्र हूण दशार्णव भोज

कुरु गान्धार विदर्भ विदेह बाह्लीक बर्बर केकय

कोसल कुन्तल टंकण कोंकण मात्स्य सैन्धव

किरात शूरसेन कर्णाज्या वन साल्व सिन्धु

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अवन्त्यादि पुण्य देशैर्विराजिते । अयोध्या मथुरा
माया काशि काञ्ची अवन्त्यिका द्वारवति पुण्यक्षेत्र
सहिते सगर वत्स कूर्म स्वामि पुष्कर शैहित
शेषाचल अचलाचल अरुणाचल घटिकाचल
वृषभाचल वृद्धाचल धर्म्माचल श्रीशैलादि पुण्या-
3b चल । समधिष्ठिते । पञ्चाशत्कोटियोजन विस्तीर्ण
भूमण्डले, लक्षयोजन विस्तीर्ण जम्बूद्वीपे भारतवर्षे
भरतखण्डे मेरोर्दक्षिणे पार्श्वे श्रीशैलस्याग्नेय दिग्भा-
गे कृष्णा कावेर्योर्मध्ये फडिर देशे परशुखड्ग त्रिशूल
वज्रवह्नि ज्वालाभय घंटा नाग पाशांकुश धृत करस्य
(चि)
दिव्यरत्न खचित किरीट केयूर नूपुर हारनाग
कुण्डलादि मण्डितस्य काश्यपात्रेय भारद्वाज विश्वा-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

-मित्र वसिष्ठ गौतम नारद पराशर व्यास शुक
शौनक दत्तात्रेयादि शिवभक्तिपरिवृतस्य निखिल
4a सुरासुर|मुनिवर सिद्ध विद्याधर गरुड गान्धर्व
यक्ष किन्नर किम्पुरुष साध्य इन्द्र ब्रह्म विष्ण्वादि
त्रयस्त्रिंशत्कोटि देवता वन्दित चरणारविन्दस्य
नन्दिमहाकाल स्कन्द पिनाकसहितस्य रम्भादि
समस्त देवता स्त्रीकरधृत छत्र चामर व्यजनादि
वीज्यमानस्य समस्त भक्तजन रक्षकस्य पार्वति-
सहितस्य श्रीमद्भगवतो भवानि शंकर सर्वाज्ञया
जगत्सृष्टि हेतोराद्यस्य ब्रह्मणः एकपञ्चाश-
द्वत्सरे प्रथमायने प्रथम ऋतौ प्रथममासे प्रथ-
मपक्षे प्रथम दिवसे अह्नि द्वितीययामे तृतीय

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

4b- मुहूर्ते प्रथम प्रणवकाले स्वायम्भुव स्वारोचिष उत्तम
तामस रैवत चाक्षुषा षट्सु मनुष्य व्यतीतेषु सप्तमे
वैवस्वत मन्वन्तरे सप्तविंशन्महायुगागतानि अष्टविंश-
न्महायुगे अष्टाविंशत्सहस्रोत्तर चतुर्लक्षाब्दे कृतयुगे-
चायाते षण्णति सहस्रोत्तर अष्टालक्षाब्दे त्रेतायुगे
चायाते चतुष्षष्टि सहस्रोत्तर अष्टालक्षाब्दे द्वापरयुगे
चायाते द्वात्रिंशत् सहस्रोत्तर चतुर्लक्षाब्दे कलियुगे
प्रथम पादे दशावतारेषु नवमे बौद्धावतारे युधिष्टिर
विक्रमार्क शालिवाहनके विजयाभिनन्दन नागार्जुन
5a कुशिकानां मध्ये तृतीये शालिवाहनशके ब्रह्मदेवर्ष-
षि पितृसाधनं नक्षत्र चान्द्र सौरमानानां मध्ये व्यव-
हारिके सौरमाने प्रभवादि षष्टिसंवत्सराणांमध्ये भवनाम

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

संवत्सरे उत्तरायणे पुष्यमासे शुक्लपक्षे अद्य चतुर्थ्यां

शुभतिथौ वासरः सौम्यवासर युक्तायां अश्वनी नक्षत्र

युक्तायां शुभयोग शुभकरण एवंगुण विशेषण विशिष्टा-

यां चतुर्थ्यां शुभतिथौ मम यजमानस्य इह जन्मनि

पूर्वजन्मनि जन्म जन्मान्तरे वा ज्ञानतोऽज्ञानतश्च मया-

कृत सर्पवध जनित पुत्र प्रतिबन्धक निवृत्तये स्त्री-

वन्ध्यापुरुष वन्ध्या कदलि वन्ध्या काकवन्ध्यादि

5b निवृत्तये अस्मिन्महति संसारचक्रे अनेकधा जनित

बहुपाप निवृत्तये कायिक वाचिक मानसिक पाप

निमित्तानां बहूनां बहुविध प्रतिबन्धकदोष निमित्ता-

नां जन्मनक्षत्र जन्मराश्यपेक्षया नाम नक्षत्र नामराश्य-

पेक्षया पञ्चमस्थान ~~स्थित~~ राहुकेतु दोष सूचित

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नेत्ररोगादि अपुत्र दुःखादि मृतवत्सादि राहुदोषश्च

महासर्पवध जनित दोष प्रायश्चित्तार्थं ब्राह्मणः

सृष्टिकालमारभ्य एतत्क्षण पर्यन्तं अनाद्यविद्यावास-

नया प्रवर्तमाने अस्मिन् संचारचक्रे विचित्राभिः कर्म-

6a गतिभिः विचित्रितासु योनिषु अनेकधा जनित्वा केनापि

पुण्यकर्म विशेषेण इदानीं सन्मानुष्येषु सद्द्विजन्म

विशेषं प्राप्तवतो मम जन्म मारस साजन्म प्रभृत्ये

तत्क्षण पर्यन्तं बाल्ययौवन कौमार वार्धक्येषु जाग्रत

स्वप्न(ज) सुषुप्त्यवस्थासु मनोवाक्काय ज्ञानेन्द्रिय कर्मे-

न्द्रिय कर्मेन्द्रिय व्यापारैस्सम्भावितानां ज्ञानतः सकृत्कृ-

तानामज्ञानतस्सकृत् कृतानां ज्ञानतोऽज्ञानतश्च अत्य-

न्ताभ्यस्तानां चिरकालाभ्यस्तानां निरन्तराभ्यस्तानां

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

[5] सर्वमनेकविधानां पापानां अतिपातकानां उपपातकानां समपातकानां संकलीकरणानां मलिनीकरणानां
68 अपात्रीकरणानां जातिभ्रंशकरणानां प्रकीर्णकानां नवानां नवविधानां बहूनां बहुविधानां सर्वेषां पापानां सद्यः अपनोदनार्थं चिन्तित सर्वाभीष्टसिद्ध्यर्थं आयुष्मत्स्वरूपस्य गुणानेकस्य पुत्रावाप्त्यर्थं (पुत्र) संभाषणनियमेन सफलवत् द्रव्य आचार्यमुखेन एभिः ब्राह्मणपुंगवैस्सह शैवागमोक्त प्रकारेण नागप्रतिष्ठा विधि (संकल्प:) कर्मणा संस्करिष्ये

" आचार्यादि (ऋत्विक्) ऋत्विवरणम् "

अस्मिन् नागप्रतिष्ठाकर्मणि सकलकर्म कारयितुं प्रधान कलशाराधनाधिदेवता प्रत्यधिदेवताराधन

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तत्प्रतिमापूजन तन्मन्त्रजपहोमाभिषेक तत्कलश वस्त्र

7a प्रतिमा प्रतिग्रहार्थं। आचार्यन्त्वां वृणीमहे। अस्मिन्

नागप्रतिष्ठाकर्मणि अनन्तकलश प्रतिमापूजन प्रतिग्र-

हार्थं ऋत्विजं त्वां वृणीमहे। 1

अस्मिन्नागप्रतिष्ठाकर्मणि वासुकिकलश प्रतिमापूजन

प्रतिग्रहार्थं ऋत्विजं त्वां वृणीमहे। 2

अस्मिन्नागप्रतिष्ठाकर्मणि तक्षककलश प्रतिमापूजन

प्रतिग्रहार्थं ऋत्विजं त्वां वृणीमहे॥ 3

अस्मिन्नागप्रतिष्ठाकर्मणि कार्कोटककलश प्रतिमापूजन

प्रतिग्रहार्थं ऋत्विजं त्वां वृणीमहे। 4

अस्मिन् नागप्रतिष्ठाकर्मणि पद्मकलश प्रतिमापूजन

प्रतिग्रहार्थं ऋत्विजं त्वां वृणीमहे। 5

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अस्मिन् नागप्रतिष्ठा कर्मणि पद्मकलश प्रतिमा पूजन

प्रतिग्रहार्थं ऋत्विजं त्वां वृणीमहे । 6

7b अस्मिन् नागप्रतिष्ठाकर्मणि शंखकलश प्रतिमापूजन प्रतिग्र-

हार्थं ऋत्विजं त्वां वृणीमहे । 7

अस्मिन् नागप्रतिष्ठाकर्मणि गुळिकलश प्रतिमापूजन ·

प्रतिग्रहार्थं ऋत्विजं त्वां वृणीमहे । 8.

॥ बुद्धिपूर्वं सर्पवधे பண்ணினும் शान्तिविधानम् ॥
ज्ञातसर्पवध शान्ति

प्रमादात् सर्पहनन प्रायश्चित्तं विधीयते ।

ज्ञात्वा तु सर्पहननं प्रायश्चित्तं न विद्यते ॥

तथा सिद्धान्तशेखरे —

ज्ञात्वा तु सर्पहनने प्रायश्चित्तं विधीयते ।

प्रस्थद्वय सुपिष्टेन आकृतिस्सर्पवत्कुरु ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अरत्नि दैर्घ्यं तद्वृत्तं सप्तैव तु कारयेत् ।

अष्टनागञ्च संपूज्य वल्मीके निक्षिपेत्ततः ॥

प्रस्थद्वयञ्च स्वर्णेन ब्राह्मणाय दद्दौच तम् ।

8a तथा मृगेन्द्रे —

कूर्चेन वाऽथ पिष्टेन कारयेन्नागरूपकम् ।

कुम्भाग्रे च प्रतिष्ठाप्य अर्चयित्वा यथा विधि ॥

ऐश्वर्य राजवश्यादि पुत्रसिध्यर्थमेव च ।

महानागप्रतिष्ठान्तु कुर्याद्देवालये बुधः ॥

देवालये स्वयं कुर्यात् शिवविष्ण्वालयेपि वा ।

नदीतीरे तटाके वा तीर्थे वा रुद्रभूमिषु ॥

अश्वत्थ सन्निधौ वाऽपि कुर्यान्नागप्रतिष्ठितम् ।

उत्तरायण कालेतु पुष्य फाल्गुन चैत्रके ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वैशाखे विधिवत्प्रोक्ता दक्षिणे चाश्विमासके ।

रोहिण्यश्च पुनर्वस्सु तिष्य श्रवण रेवती ॥

स्वाति चैत्र भगश्चैव मूलाश्लेषाश्च उत्तमाः ।

४६ सोम सौम्य भृगोर्वारे प्रशेरादित्य हस्तके ॥

भद्रादि तिथयः प्रोक्ताः नन्दारिक्ताश्च वर्जयेत् ।

प्रतिष्ठां स्थिरलग्नन्तु मध्यमञ्चोभयात्मकम् ।

चतुर्थ्यां कार्तिके मासे शुक्लपक्षे शुभे दिने ।

नागप्रतिष्ठा कर्तव्या अन्येषान्तु विवर्जयेत् ॥

। नागप्रमाणम्, नागनिर्णयम् ॥

अरत्नि द्वयमात्रं वा बाहुमात्रमथापि वा ।

नागस्य भोगो विज्ञेयो बाहुवत्स्थूलमुच्यते ।

एकवक्त्रं द्विवक्त्रं वा त्रिवक्त्रं पञ्चवक्त्रकम् ।

(वं) एकवक्त्रं राजवश्यं द्विवक्त्रं भोगमेव च ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

त्रिवक्त्रो पुत्रसिद्धिस्तु पञ्चवक्त्राद्यशोऽभवत् ।

दंपत्यां पुत्रसौभाग्यं वश्यभोगाद्यशोऽभवत् ॥

एकवक्त्रादि नागान्तु कृत्वा शिल्पिवरेण तु ।

9a प्रतिष्ठाप्य शुभेद्देशे सर्वसिद्धिमवाप्नुयात् ॥

॥ आचार्यऋत्विजां वेदपारायणम् ॥

प्रतिष्ठा दिवसात्पूर्वं कृत्वा ब्राह्मण भोजनम् ।

आशिषो वाचयित्वा तु आचार्यं वरयेत्ततः ॥

आदिशैवकुलोद्भूतमागमार्थ विशारदम् ।

शान्तं दान्तं जितक्रोधं कुटिम्बिनमरोगिणम् ॥

वेद शास्त्रार्थ कुशलं लौकीकेषु विचक्षणम् ।

आचार्यं वरयेत्पश्चात् (द) दीक्षायुक्तं तथेतरम् ॥

अष्ट विप्रांश्च वरये दृत्विज शास्त्र वित्तमान् ।

वेद पारायणार्थञ्च वरयेदष्ट संख्यकान् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

॥ मृत्संग्रहणम् ॥

कृत्वा तु सर्वकर्माणि देशिको ब्राह्मणैस्सह ।

आगमोक्त विधानेन मृत्संग्रहण पूर्वकम् ॥

१८ वास्तु होमं ततः कृत्वा अंकुरार्पणमेव च ।

विष्णु क्रान्ति दुलैश्शुभ्रैर्बेरशुद्धिञ्च कारयेत् ॥

॥ नेत्रोन्मीलनम् ॥

प्रक्षाल्य सर्वबेरञ्च पूजा कार्यार्थ सिद्धये ।

अभिषिच्यार्घ्य तोयेन गन्ध पुष्पाद्यलङ्कृतम् ॥

नेत्रोन्मीलन मन्त्रेण नेत्रयुग्मं लिखेत्क्रमात् ।

विश्वतश्चक्षु मन्त्रेण स्वर्ण चिकया सह ॥

मधु सर्वेभ्यामिति मन्त्रेण मधुना स्वर्ण दूर्वया ।

शिल्पिनं विसृजेत्पश्चाद्वस्त्रहेमांगुलीयकैः ॥

॥ जलाधिवासनम् ॥

जलाधिवासनं पश्चाद्धान्य वस्त्रादिवासनम् ।

त्रिरात्रमेकरात्रं वा यामं यामार्धमेव वा ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अधिवासन वेलायां गंगादीनाञ्च पूजयेत् ।

१०८ आचार्यो जापकान् ऋत्विक् वेदपारायणान् बहून् ॥

उदकशान्तिं रुद्रसूक्तं श्रीसूक्तं रात्रिसूक्तकम् ।

घृतसूक्तं पुरुषसूक्तं पञ्चशान्तिं जपेत्क्रमात् ॥

जलादुद्धाप्य बेरञ्च कृत्वा ग्राम प्रदक्षिणम् ।

क्षीराधिवासनं कुर्यात् पयसूक्तेन मन्त्रतः ॥

धान्य सूक्तेन मन्त्रेण शाल्याद्धान्याधिवासयेत् ।

इदं वस्त्राणि युग्मासु परिवित वस्त्राधिवासनम् ॥

॥ रक्षाबन्धनम् ॥

त्र्यंबकेति मन्त्रेण रक्षासूत्रन्तु बन्धयेत् ।

बृह......मेति मन्त्रेण भस्मरक्षाञ्च कारयेत् ॥

॥ शयनम् ॥

नागगायत्रिमन्त्रेण शयनादीन् प्रकल्पयेत् ।

अण्डजं मण्डजं चैव रोमजन्धातुजं तथा ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वर्मजं शयनेपञ्च वेद्यूर्ध्वे विन्यसेद्बुधः।

10b नाग गायत्रि मन्त्रेण (शय) शयने शाययेद्[त्] बुधः॥

॥ यागशाला ॥

षोडशस्तम्भ संयुक्तं वितानध्वज भूषितम्।

तन्मध्ये वेदिकां[इ] कृत्वा हस्तद्वय समानकम्॥

अष्टांगुलोच्छ्रितं कृत्वा उपवेदि समन्वितम्।

दर्पणोदर संकाशं शालिपिष्टेन रञ्जयेत्॥

तत्पूर्वे हस्तमानेन वृत्तकुण्डं प्रकल्पयेत्।

नाभियोनि समायुक्तं मेखला त्रय संयुतम्॥

वेद्योपरि विनिक्षिप्य चतुर्द्रोण प्रमाणतः।

धान्यार्धं तण्डुलश्चैव तदर्धैश्च तिलैरपि॥

॥ कलशंगल सूत्रम् ॥

पद्ममष्टदलं लिख्य तन्मध्ये स्थापयेद्घटान्।

साम्रपत्रान् नालिकेरान् सरत्नान् सूत्रवेष्टितान्॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

॥ ८ सकूर्चान् रक्तवस्त्रांश्च सुगन्धाम्बारि पूरितान् ।

॥ दाननागप्रमाणम् ॥

दश निष्क सुवर्णेन तदर्द्धार्धेन वा पुनः ।

स्वर्णेन नाग प्रतिमां कृत्वात द्विरसूपिणम् ।

प्रधान प्रतिमाद्वंशे येकांशे पञ्चधा कृतः ॥

आचार्यः ऋत्विजैस्सार्द्धं स्नत नस्त्रोत्तारीयकैः ।

पञ्चमुद्रासमायुक्ताः कर्णाङ्गुलि विभूषणः ॥

नित्य नैमित्तिकं सन्ध्या सन्ध्यायाम्तु विशेषतः ।

विशेषेणच संकल्प्य पुण्याहं वाचयेत्क्रमात् ॥

॥ सूर्यपूजा ॥

सूर्यपूजां ततः कृत्वा गणेशं पूजयेत्ततः ।

प्राण संयमनं कृत्वा सकलीकरणञ्चरेत् ।

॥ द्वारदेवता ॥

सामान्यार्घ्यञ्च संसाद्य प्रोक्षये द्वारणान् ।

शान्तिभूत बलारोगयान्यसेत् पूर्वादितोरणे ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

॥८ दुर्गा सरस्वती लक्ष्मी द्वारस्योर्ध्वे समर्चयेत्।

द्वारस्य उत्तरे पार्श्वे सहस्रशिरसे नमः॥

तद्वार दक्षिणे पार्श्वे आदिशेषं समर्चयेत्।

दक्षिणे द्वार पूर्वे तु भूमिधारण पश्चिमे॥

भणाभणिमाण्डितश्च पश्चिमे द्वार दक्षिणे।

तक्षं पूजयेत्पश्चादुत्तरेमाणिगर्भितम्॥

उत्तर द्वार पश्चिम्या महानागन्तु पूर्वके।

महानालञ्च संपूज्य द्वाराणामुभय पार्श्वयोः॥

नित्यवत्पश्चिमद्वारे दृष्ट्यादिव्यन्तरिक्षके।

नैरृते वास्तुनाथञ्च पूजयेदुपचारकैः॥

पूर्वादिदिक्ध्वजे पूज्य वज्रादि क्रमदेवतान्।

कुमुदादीन् पताकासु हेतुकाद्यष्टकं यजेत्॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

12a मण्डपोर्द्ध्वे स्थितो कन्यां पूर्वस्यादि ब्रह्मपञ्चकम्।

वेदि दक्षिण पार्श्वेतु व्याघ्रस्यासनोपरि॥

स्थित्वा देवस्य दक्षिण्यां करन्यासं समाचरेत्।

॥ भूतशुद्धिः ॥

भूतशुद्धिं ततः कृत्वान्तर्यजनमाचरेत्।

स्थानशुद्धिं ततः कृत्वा मन्त्रशुद्धिं समाचरेत्॥

दण्डभंग्या मुण्डभंग्या कालभंग्या च विन्यसेत्।

विशेषार्घ्यञ्च संसाध्य पञ्चमुद्राश्च धारयेत्॥

पञ्चगव्यञ्च संसाध्य शालादीन् प्रोक्षयेत्कुशैः।

विकीरान् विक्षिपेदस्त्रैः सर्व विघ्नापनुत्तये॥

कुशकूर्चोपसंहृत्य वर्द्धन्यासनया बुधः।

नैरृते वास्तु संपूज्य पश्चिमे नागकन्यकाम्॥

॥ वागीश्वरपूजा ॥

ऐशान्याः पदु वागीशीं वागीश्वरञ्च पूजयेत्।

12b इन्द्रादि लोकपालांश्च यथाविधि समर्चयेत्॥

वायव्यान्तु गणेशञ्च ऐशान्यान्तु गुरुं यजेत्।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

॥ इन्द्रादिकलशाः शान्त्यादिशक्तिपर्यन्तम् ॥ कलशपूजा

[क्र]
प्रधानकलशेष्वत्र महानागस्वरूपम् ।
ध्यात्वा नागेश बिम्बन्तु विन्यसेत् (घट) घटमध्यमे ॥
शान्त्यादि शक्तिपर्यन्तमर्चयेदष्ट कन्यकाम् ।
कमला उत्पलापालिं नागकन्याश्च शामलाम् ॥
देहिनिं पादुसर्पाञ्च शेषबालाष्ट शक्तयः ।
सूर्यसोमाग्नि शक्तिश्च मण्डलाश्च चतुष्टयेत् ॥
ब्रह्माविष्णुश्च रुद्रश्च महानागं यजेत्क्रमात् ।
सौकन्तं शतं कलान्यासं न्यसेन्नागेश्वरं क्रमात् ॥
आवाहनादि संस्कारं तत्तन्मन्त्रैः प्रपूजयेत् ।
हेमवर्णम्महानागं कुण्डलाभरणोज्वलम् ॥
13a कृताञ्जलि फटोपेतं ध्यात्वा नागेश्वरं यजेत् ।
श्रीदेवि भूमिदेविञ्च यजेत्तद्वक्षवामयोः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

श्यामवर्णं निभां भास्वद्राजीवसमलोचनाम् ।

हेमयज्ञोपवीतञ्च द्विभुजाञ्च द्विलोचनाम् ॥

सर्वावयवसंयुक्तां एवं ध्यात्वा सुयोजयेत् ।

धूपदीपञ्च नैवेद्यं ताम्बूलाद्युपचारकैः ॥

ऐशान्यां वह्निं स्थाप्य ध्यात्वा नागेश्वरं यजेत् ।

॥ प्रधानकुम्भाः अनन्तादि गुलिकान्तम् ॥

अनन्तादीद्यतेष्वेतान् तत्तन्नाम्ना प्रपूजयेत् ॥

संपूज्य गन्धपुष्पाद्यैरासनाद्युपचारतः ।

आवाहनादिभिर्मन्त्रैः प्रत्येकन्तु विशेषतः ॥

एवं संपूज्य सर्वेषां षडङ्गन्यासपूर्वकम् ।

मात्रकान्यासमन्त्रेण पादादि शिरसान्तकम् ॥

136 नागगायत्रिमन्त्रेण जपमष्टोत्तरं शतम् ।

॥ स्वर्णनागदानम् ॥

स्वर्णेन नागप्रतिमां कृत्वा तत्तद्वेररूपिणीम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

संपूज्य सर्पसूक्तेन मूलमन्त्रेण वा पुनः।

वेद्योपरि विनिक्षिप्य पूजां कुर्याद्यथोक्तवत्॥

पूर्वादीशानपर्यन्तं अनन्तादि घटान्यजेत्।

अनन्तं पूर्व कुम्भे तु आसनाद्युपचारकैः॥

॥ अष्टनागाध्यानम्, विद्येश्वर कुम्भाः॥

अनन्तस्य स्वरूपन्तु द्विकञ्च चतुष्करम्।

अभयं वरदञ्चैव अक्षमाला स्वरूपकः॥

वासुकिं रक्त वर्णन्तु त्रिवक्त्रञ्च चतुष्करम्।

अभयं वरदञ्चैव अक्षमालाञ्च कुण्डिकाम्॥

तक्षकं दक्षिणे कुम्भे पूजयेद्युपचारकैः।

तक्षकं नीलवर्णञ्च एकवक्त्रं द्विहस्तकम्॥

14a जटामकुट संयुक्तं विचित्रं फण|संयुतम्।

कार्कोटकं नैरृते पूज्य सर्वद्रव्योपचारकैः॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कार्कोटकं धूम्रवर्णञ्च पञ्चवक्त्रं द्विहस्तकम्।
भूम्याधारस्वरूपञ्च कृताञ्जलिपुटो भवेत्॥
पश्चिमे शङ्ख कुम्भन्तु ध्याये देव मनोहरम्।
शङ्खस्य श्वेतवर्णन्तु एकवक्त्रं द्विहस्तकम्॥
सर्वाभरण संयुक्तं अभयं वरान्वितम्।
पद्मन्तु वायव्ये पूज्य संस्कारो रक्षकं यजेत्॥
पद्मस्य श्वेतवर्णन्तु दशवक्त्रं महाभुजम्।
सर्वाभरण संयुक्तं ध्याये शेषं महाबलम्॥
बालन्तु उत्तरे पूज्य पूजये गन्ध पुष्पकैः।
महाबाल स्वरूपन्तु एकवक्त्रं द्विहस्तकम्॥
14b मौञ्जी कृष्णाजिनधारं नाग यज्ञोपवीतकम्।
ऐशान्यां गुलिकं पूज्य सर्व द्रव्योपचारकैः॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

फलिकं पञ्चवक्त्राण्यं द्विभुजं रक्तवर्णकम् ।
ऊर्ध्वदंष्ट्रसमायुक्तं क्रूरवक्त्रसमन्वितम् ॥
एवंध्यात्वा महानागान् अष्टदिक्षु यजेत्क्रमात् ।
संपूज्य गन्धपुष्पाद्यैः आसनाद्युपचारतम् ॥
आवाहनादिभिस्सर्वैः पूजां कृत्वा विशेषतः ।
एवं संपूज्य ते देवान् षडङ्गन्यासपूर्वकम् ॥
पादादि शिर पर्यन्तं अष्टांगन्यासमाचरेत् ।
नागगायत्रिमन्त्रेण जपमष्टोत्तरं शतम् ॥
कल्पोक्तेन च संपूज्य सर्वद्रव्योपचारकैः ।
॥ अग्निकार्यम् ॥
अग्निकार्योक्तमार्गेण शिवाग्निञ्च प्रकल्पयेत् ॥
15a वक्त्रीकरणादिषु दीपनां तन्त्रहोमयेत् ।
॥ मूलुचिहोमः ॥
नागस्य मूलमन्त्रेण पलाशे होमयेत् शतम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

गागगायत्रीमन्त्रेण गालुचिं वैतसिमपि ।

दूर्वा होमन्तु मूलेन प्रत्येकन्तु शतं शतम् ॥

पञ्चब्रह्म षडङ्गैश्च लाजसर्षपमाषक ।

निष्पावमुद्गं बञ्च तिल गोधूम व्रीहयवान् ।

चरूंश्च सक्तु द्रव्याणि प्रत्येकन्तु शतं शतम् ।

पालाशं ईशमन्त्रेण वटं पुरुष मन्त्रतः ॥

अघोरेण शमिं हुत्वा खादिरं वामेन होमयेत् ।

औदुम्बरन्तु सद्येन दूर्वाहृदय मन्त्रतः ॥

अर्कन्तु शिरसा शिखायाश्वत्थमेव च ।

कवचेन कुशं हुत्वा अपामार्गन्तु नेत्रकम् ॥

- - - - - - - बिल्वमस्त्रेण होमयेत् । [?]

15 b मूलेनाज्येन हुत्वा तु प्रत्येकन्तु | शतं शतम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नमोस्तु सर्पेभ्य इति मन्त्रेण हुत्वाज्येन सहस्रकम् ।
मूलेनैव सहस्रेण तदर्धं वा तदर्धकम् ॥
स्पृष्ट्वा स्पृष्ट्वा तु जुहुयात् द्रव्यं प्रति विशेषतः ।
व्याहृतिभिश्च हुत्वा तु हव्यवाहेन मन्त्रतः ॥
पञ्चगव्यं चरुं प्राश्य दन्तधावनमाचरेत् ।
आचार्यो यजमानैश्च रात्रौ जागरणं चरेत् ॥

॥ अपरेद्युः बिम्बशुद्धिः ॥

प्रभाते विमले स्नात्वा नित्यकर्मादिकञ्चरेत् ।
आचार्यो ऋत्विजैस्सार्धं यागमण्डपमाविशेत् ॥
पूर्वोक्त द्वारपूजादि दीपनान्तं यथाक्रमम् ।
बिम्बशुद्धिं ततः कृत्वा स्नानवेद्युपरिन्यसेत् ॥
पञ्चात्वत् मृत्तिकाम्भोभि पल्लवः पञ्चगव्यकम् ।
सस्यौषध्द्ध्योदकं गन्ध बिल्व पुष्प हिरण्यकम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

16a धान्योर्ध्वैव रत्नोर्दं एतद्द्रव्येण स्वर्षयेत् ।
स्नापयेन्मन्त्रतोयेन पञ्च शान्तिं जपेततः ॥
शयने शाययै [ते] बिम्बं अ फ्ड जाद्यासनोपरि ।
ग्रहोपकरणादीनि पादुदेशेषु निक्षिपेत् ॥
॥ तत्वत्रिखण्डम् ॥
तत्वन्यास क्रमादेव त्रिखण्ड परिकल्पयेत् ।
न्यस्त्वा तत्वत्रियं शेषं जान्कखण्ड शिरोवधि ॥
पुष्पमालान्ततः कृत्वा त्रिखण्डं परिकल्पयेत् ।
पुनश्चाग्निं ततः कृत्वा तत्व तत्वेश्वरान् हुनेत् ॥
शान्तिकुम्भे शतं जपत्वा संपाताहुतिमाचरेत् ।
बिम्बान्तिकं ततो गत्वा आत्मतत्वाधिपं यजेत् ॥
। शान्तिकुम्भम् ॥
शान्तिंभसाच संप्रोक्ष्य कुशमूलेन संस्पृशेत् ।
आत्मतत्वाधिपः प्रोक्त अनन्त यावद्दोष समुत्थितम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

166 बिम्बं तावत्त्वयातैव स्थातव्यं सन्निधानतः ।
।मूर्तिमूर्तीश्वराः॥
स्पृशेदिति विज्ञाप्य मूर्तिमूर्तीश्वरान् यजेत् ॥

क्ष्मा वह्नि यजमानार्क जलवाय्विन्दुखानि च ।

अनन्त वासुकि तक्षक कार्कोटक श्च पद्मकम् ॥

महापद्मश्च शंखश्च पालं गुलिक संज्ञिकम् ।

एते मूर्तीश्वरान् पूज्य प्रकृत्यन्तश्च तत्त्वकम् ॥

पुनश्च वह्निमासाद्य तत्त्व तत्त्वेशान् हुनेत् ।

मूलेनाज्येन जुहुयात् अष्टोत्तर शतं हुनेत् ॥

शान्ति कुम्भेभिमन्त्र्याथ बिम्बं संपूज्य यत्नतः ।

कर्ण देशे तु संपूज्य विद्यातत्त्वेश्वनन्तकम् ॥

कुशमध्येन संस्पृश्य प्रोक्षयेदस्त्र मन्त्रतः ।

विद्यातत्त्वाधिपे तक्ष्म याव द्दोष समुद्भितम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

: बिम्बं तावत्वयात्रैव स्थातव्यं सन्निधानतः।

17a. क्ष्मादिमूर्ति तदीशांश्च क्रमाद्विद्वेश्वरान्यजेत्॥

अग्नौ हुत्वा तु मूलेन तत्व तत्वेश्वरान् हुनेत्।

शान्तिकुम्भोभिमन्त्र्याथ संपाताहुतिमाचरेत्॥

बिम्बे संपूज्य तत्वेशं तत्व तत्वेश्वरान् यजेत्।

शिव तत्वाधिपे नागा यावद्दोष समुत्थितम्॥

बिम्बं तावत्वयात्रैव स्थातव्यं सन्निधानतः।

क्ष्मादिमूर्ति तदीशांश्च क्रमाद्विद्येश्वरान् यजेत्॥

हुत्वा जप्त्वा तु सन्ध्याया क्रमाद्विद्वेश्वरान् यजेत्।

नागस्य मूलमन्त्रेण सहस्रं वा तदर्धकम्॥

पूर्णाहुतिं ततः कुर्यात् नागस्य मूलमन्त्रतः।

॥ गायत्रि प्रायश्चित्तम्॥ नाग गायत्री

महानागाय विद्महे शंखपद्माय धीमहि -

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तन्नोशेष प्रचोदयात् ॥

१७८ ओं महानागाय स्वाहा । ओं अनन्ताय स्वाहा । इत्यादिरष्टो-

त्तरशतं हुनेत् ।

॥ ऋत्विक् दाननागपूजा ॥

देशिकस्य नियोगेन मूर्तिवा एतदनन्तरम् ।

नागगायत्रि मन्त्रेण प्रत्येकञ्चाष्टोत्तरं शतम् ॥

दर्भाग्रेणत संस्पृश्य जप्त्वा तदृत्विजैस्सह ।

संपूज्याग्नौच सन्तर्प्य प्रायश्चित्तं ततः कुरु ॥

मूलमन्त्र शिवास्त्रौश्च शतमष्टोत्तरं हुनेत् ।

ततः पूर्णाहुतिं हुत्वा तत्तन्मूलाण्डनान्तथा ॥

पूर्वोक्तेन विधानेन सर्पकेरप्रतिष्ठितम् ।

शान्त्याद्यासन पर्यन्तं पूजयित्वा यथाविधिः ॥

षडंगन्यासमन्त्रेण न्यसेत्तं सर्पराजकम् ।

प्राणप्रतिष्ठां कुर्वीत आगमोक्त विधानतः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अस्य श्री प्राणप्रतिष्ठा मन्त्रस्य इत्यादि जपन्मार्गेण

मार्गेण जीवन्यासं समाचरेत् ।

18a विसृज्याग्निस्थितं देवं कुंभमध्ये तु योजयेत् ।

॥ कुम्भाभिषेकम् ॥

कुम्भान्कृद्धाय नागस्य शिरस्थानेभिषेचयेत् ॥

शान्तिकुम्भौ च तत्पार्श्वे अनन्तादि यथा क्रमम् ।

अभिषिच्य यथान्यायं पूजयेत्सर्पराजकम् ॥

पञ्चामृतैः पञ्चगव्यैः नारिकेल इक्षुसारकैः ।

गन्धोदकाद्यैस्संपूज्य धूपदीपं प्रकल्पयेत् ॥

जाति कुन्दादि पुष्पैश्च तुलसी करवीरकैः ।

॥ अङ्गपूजा ॥

अंगपूजां प्रकर्तव्य पादमारभ्य बुद्धिमान् ॥

श्रीकृष्णाय नमः पादौ पूजयामि, विष्णवे नमः गुल्फौ-

पूजयामि, हराय नमः जंघे पूजयामि, माधवाय नमः -

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

-जानुनी, ब्रह्मणे नमः ऊरू पूजयामि, भास्कराय नमः

कटिम्, ईश्वराय नमः नाभिम्, विश्वरूपाय नमः।

18b उदरम्, महाकालाय नमः वक्षसि, सृष्टिस्थित्यन्तकार-

-णाय नमः बाहून्। विश्वमूर्तये नमः कण्ठौ, वासुदे-

वाय नमः मुखम्, बलिबन्धनाय नमः शिरः पूजयामि,

त्रिविक्रमाय नमः पार्श्वौ, आदिशेषाय नमः सर्वांगं

पूजयामि, इत्यङ्गानि संपूज्य महानैवेद्यमाचरेत्।

हसप्रक्षालनं धूप दीपनैवेद्यमेव च।

ताम्बूलं भस्म रक्षाञ्च षोडशैरुपचारकैः॥

प्रदक्षिण नमस्कारैः आशीर्वादपुरस्सरम्।

साष्टांग दण्डवत्प्रार्थ्य अभीष्ट सिद्धयेत्ततः॥

आचार्यं पूजयेत्पश्चात् वस्त्रहोमांगलीयकैः।

गां दद्यात् गुरवे प्रार्थ्य गोकुलस्याभिवृद्धये॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

19a ऋत्विजान् दक्षिणाद्दैश्च दद्यात् जापकान् तथा।

परिवारांश्च दक्षिणां पूजयेत् यथाविधि॥

॥ दशदानम् ॥

दशदानादि कुर्वीत यथोक्त द्रव्य संयुतम्।

भूरिदानं विशेषेण ब्राह्मणाय प्रदापयेत्॥

ब्राह्मणान् भोजयेत्पश्चात् भक्ष्य भोज्य समन्वितम्।

विवाहं कारयेत्पश्चात् स्वसूत्रोक्तैव मन्त्रतः॥

॥ दम्पति ब्रह्मचारि ॥

दम्पतिं पूजयेत्पश्चात् सर्वद्रव्योपचारकैः।

ब्रह्मचारिसुवासिन्यौ भोजयेत्परमान्नकैः॥

एवं कृत्वा नागराज प्रतिष्ठा प्रीतिसंयुतम्।

[मो]
यत्कामन,वाप्नोति तत्कामं तद्गुणेनवे॥ ✓

भर्तारं लभते कन्या पुत्रकामेलभेत्सुतम्।

वश्यकामो लभेद्वश्यं जयकामो लभेत् जयम्॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

धनकामो(न्नो)धनं प्राप्य मोदन्ते दिवि देववत्।

198 आश्विज शुक्लपक्षे तु चतुर्थ्यां सर्पराजकम्॥

प्रतिवर्षं यजेद्विद्वान् सर्वकामार्थ सिद्धये।

ब्राह्मणान् परमान्नेन भोजयेदुपरेहनि॥

स्तोत्रै स्तुत्वा तु नागेशं क्षमस्वेति नमस्कृतः।

एवं यः कुरुते मर्त्यो पुत्रपौत्राभिवृद्धये॥

सर्पभाद्य विरहितः प्राप्नुयात्परमं पदम्।

इति रौरवाख्ये महातन्त्रे नागप्रतिष्ठाविधि

। सप्तविंशति पटलः॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

(B)



२०a । शैवागमपद्धति ॥

। नागप्रतिष्ठापद्धति ।

। सूर्यपूजा முதல் पद्धति ।

ततः குரு स्नातो नित्याह्निकं द्वयो குருः परित्यक्त भोजनो

मूर्तिपैस्सहितो मखालयं गत्वा सूर्यपूजां कृत्वा समाचम्य

भस्मधारणं कृत्वा सकलीकृत्य सामान्यार्घ्यं संसाध्य

सामान्यार्घ्यहस्तो मण्डपात् बाह्ये स्थित्वा पूर्वद्वारम-

स्त्रेण संप्रोक्ष्य कवचेनावकुण्ठ्य तोरणमध्ये ओं हां

शान्ति शान्ति तोरणाय नमः, ओं हां शान्तितोरणाधिपतये

भद्राय नमः, तोरण तोरण शाखयोः – ओं हां ऋग्वेदाय-

नमः, ओं हां कृतयुगाय नमः त्रिशूले, ओं हां पूष्णे नमः

ओं हां धात्रे नमः ओं हां विधात्रे नमः द्वारोत्तरपताकायां,

२०b ओं हां प्रशान्ताय नमः. द्वारदक्षिण पताकायां, ओं हां

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शशिराय नमः ओं हां भूलोकाय नमः ओं हां भुवर्लोकाय

नमः ओं हां प्रत्युषाय नमः ओं हां प्रभासाय नमः

ओं हां सोमाय नमः ओं हां भौमाय नमः द्वारोत्तरकुम्भे

ओं हां शान्तिकलायै नमः उर्ध्वोदुम्बरे ओं हां गणपतये नमः

ओं हां सरस्वत्यै नमः ओं हां महालक्ष्म्यै नमः शान्तिकलशोपरि

ओं हां दुर्गायै नमः उत्तर शाखायां ओं हां गंगायै नमः

द्वार दक्षिण कुम्भे ओं हां सरस्वत्यै नमः दक्षिणशाखायां

ओं हां यमुनायै नमः अधो दुम्बरे ओं हः अस्त्राय द्वारपालाय

नमः ओं हां मवर्गाय नमः ओं हां कवर्गाय नमः अधिदै-

वतात्वेन ओं हां ईश्वराय करणेश्वराय नमः अधिष्ठा-

३१a नितत्वेन | ओं हां तत्पुरुष नक्षत्राय नमः इति संपूज्य द्वारोपरि

स्थित ध्वजे ओं हां कुमुदाय नमः अग्निकोणध्वजे

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ओं ह्रां कुमुदाक्षसनाय नमः दक्षिणद्वारमस्त्रेण संप्रोक्ष्य

कवचेनावकुण्ठ्य तोरणमध्ये ओं ह्रां भूतितोरणाय नमः

ओं ह्रां भूतितोरणाधिपतये विजयाय नमः तोरणशाखयोः

ओं ह्रां यजुर्वेदाय नमः ओं ह्रां त्रेतायुगाय नमः त्रिशूले

ओं ह्रां भवाय नमः ओं ह्रां पर्जन्याय नमः ओं ह्रां इन्द्राय नमः

द्वारपूर्व पताकायां ओं ह्रां पर्जन्याय नमः द्वा[रप]....श्चिमपता-

कायां ओं ह्रां अशोकाय नमः ओं ह्रां स्ववर्लोकाय नमः

ओं ह्रां महर्लोकाय नमः ओं ह्रां मजधन्याय नमः ओं ह्रां

31b बुधाय नमः ओं ह्रां | बृहस्पते नमः द्वारपूर्वकुम्भे ओं ह्रीं

विद्याकलायै नमः ऊर्ध्वोदुम्बरे ओं महागणपतये नमः

ओं ह्रां सरस्वत्यै नमः ओं ह्रां महालक्ष्म्यै नमः विद्याकलश-

पूर्वकुम्भे ओं ह्रां गंगायै नमः द्वारपूर्व शाखायां ओं ह्रां

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सिन्धवे नमः द्वारपश्चिमकुम्भे ओं हां यमुनायै नमः

द्वारपश्चिमशाखायां ओं ह्रां सरस्वत्यै नमः अथोदुम्बरे

ओं हां अस्त्राय द्वारपालाय नमः ओं हां चवर्गाय नमः

ओं हां टवर्गाय नमः ओं हां रुद्राय कारणेश्वराय नमः

ओं हां अघोर हृदयाय नमः द्वारोर्ध्वध्वजे ओं हां पुण्ड-

रीकाय नमः नैऋति कोणध्वजे ओं हां वामनाय नमः

पश्चिमद्वारमस्त्रेण संप्रोक्ष्य कवचेनावकुण्ठ्य तोरणमध्ये

22a ओं हां| बलतोरणाय नमः बलतोरणाधिपतये वज्राय नमः

तोरण शाखयोः ओं हां सामवेदाय नमः द्वापरयुगाय नमः

त्रिशूले ओं हां मध्यमणे नमः मित्राय नमः ओं हां त्वष्ट्रे

नमः द्वार दक्षिण पताकायां भूत संजीवनाय नमः

द्वारोत्तर पताकायां ओं हां अमृतसञ्जीवनाय नमः

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ओं हां जनलोकाय नमः तपोलोकाय नमः ओं हां विधात्रे
नमः ओं हां धात्रे नमः ओं हां भार्गवाय नमः ओं हां
धनेश्वराय नमः द्वारदक्षिण कुम्भे ओं हां निवृत्तिकलायै-
नमः ऊर्ध्वोदुम्बरे ओं हां गणपतये नमः ओं हां सरस्व-
त्यै नमः महालक्ष्म्यै नमः निर्वर्ति दक्षिण कुम्भे ओं हां
गोदावर्यै नमः द्वारदक्षिण शाखायां ओं हां गौतमै नमः
22b द्वारोत्तरकुम्भे ओं हां नर्मदाय नमः अधोदुम्बरे अस्त्रा-
य द्वारपालाय नमः ओं हां तवर्गाय नमः ओं हां पवर्गाय-
नमः ओं हां ब्रह्मणे कारणेशाय नमः ओं हां सद्योजातमूर्तये-
नमः द्वारोर्ध्व ध्वजे ओं हां शंखकर्णाय नमः वायुकोण-
ध्वजे ओं हां सर्पनेत्राय नमः उत्तरद्वारमस्त्रेण संप्रोक्ष्य
कवचेनावकुण्ठ्य तोरणमध्ये ओं हां आरोग्यतोरणाय-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नमः ओं हां आरोग्य तोरणाधिपतये नीललोहिताय नमः
तोरण शाखयोः ओं हां अथर्ववेदाय नमः ओं हां
कलियुगाय नमः त्रिशूले ओं हां विष्णवे नमः ओं हां
सवित्रे नमः ओं हां अंशुमते नमः द्वारपश्चिमपताकायां
Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ततो कौतुकसूत्रञ्च बद्ध्वा गाङ्ग प्रदेशके ।

शयनं पञ्चधा कल्प्य ममाद्यैरप्यनुक्रमात् ॥

शयनं शाययेद्बिंबं प्राक्शिरश्चोर्ध्ववक्त्रकम् ।

अक्षराणि च विन्यासं न्यस्तव्य विधिना कुरु ॥

4a अन्वाधानादिकं सर्वं अग्निकार्योक्तमाचरेत् । होम॰

कुण्डमध्ये यजेद्धीमान् ना… स्याहुतिरूपकान् ॥

समिधाज्य चरून्लाजान् सर्षपांश्च यवास्तिलान् ।

होमद्रव्याणि सप्तेतान् होमयेद्देशिकोत्तमः ॥

षडङ्गं मूलमन्त्रैश्च प्रत्येकञ्च सहस्रकम् ।

सर्पगायत्रि मन्त्रैश्च अष्टोत्तर सहस्रकम् ॥

द्रव्यं प्रति विशेषेण कुर्यात्स्पर्शाहुतिन्तथा ।

मकुटं वदनञ्चैव हृदयन्नाभि गुह्यकम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पादौचैव तद्द्वयं कृत्वा तेनैव मन्त्रतः।
मूर्द्धादि पाद पर्यन्तं कृत्वान्ते च तथा स्पृशेत्॥

Ah एवं जागरणं रात्रौ प्रभाते स्थापनं कुरु। स्थापनस्थलं
मूल प्रासाद बाह्ये व प्रतीच्याम्दिशि दक्षिणे॥
अथवा शांकरे देशे आलयाभ्यन्तरेपि वा।
स्थापनन्तु प्रकुर्वीत फलार्थी फलदायकम्॥
कोटियज्ञ फलन्तस्य लभते नात्र संशयः।
स्नानानि संकटेचैव देवालय समीपके॥
स्वामि पुष्करणीतीरे स्नापनं कुरु बुद्धिमान्।
आचार्यो मूर्तिपैस्सार्धं स्नानतियमथाचरे॥
उत्थाय शयनं नागं स्नापनञ्च ततः परम्।
प्रायश्चित्तं ततो कृत्वा अष्टोत्तर सहस्रकम्॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अष्टबन्धं ततः कृत्वा बन्धयेत्स्कन्दं कुरु।

51 सुमुहूर्ते सुलग्ने च गुरवे सन्निवेशयेत्॥

कुम्भान्कृत्य शिरसा आवृतान् कलशोधकान्।

अभिषिच्य क्रमाण्येतान् शैवान्वैव माचरेत्॥

धूप दीपञ्च नैवेद्यं ताम्बूलाद्युपचारकैः।

पुष्पाञ्जलिं ततो दत्वा प्रणम्य दण्डवद्भुवि॥

मन्त्रहीनं क्रियाहीनं द्रव्यहीनं कृपानिधे।

यत्पूजितं मयादेव परिपूर्णं तदस्तु ते॥

यजमानं ततो द्रव्य वस्त्रालंकार भूषणैः।

शान्ति कुम्भाभिषेकञ्च दानानि च यथाक्रमम्॥

आचार्यं पूजयेत्पश्चात् गोदानं भूमिदानकम्। आचार्यपूजा

उत्तमं पञ्चनिष्कस्यात् मध्यमन्तु तदर्धकम्॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तदूर्ध्वं अधमं ज्ञेयं आचार्यस्य तु दक्षिणाम् ।

ऋत्विग्भ्यो दक्षिणां दद्यात् दम्पती पूजयेत्क्रमात् ॥

दशदानं ततः कृत्वा सर्वेभ्यो भूरिदक्षिणाम् । दशदान

ब्राह्मणान् भोजयेत्तत्र अष्टोत्तर शतानि च ॥

आशीर्वादं ततो ग्राह्य सर्वान्कामानवाप्नुयात् ।

इति कारणे प्रतिष्ठातन्त्रे नागप्रतिष्ठा विधि पटलः । समाप्त

शान्तुमर्हन्ति सन्तः । शुभ तिथौ गोत्रस्य शर्मणः संकल्प

मम अस्माकं सह कुटुम्बानां क्षेमस्थैर्य विजय

आयुरारोग्य ऐश्वर्याभिवृद्ध्यर्थं धर्मार्थकाममोक्ष

चतुर्विध फलपुरुषार्थसिद्ध्यर्थं इष्टकामार्थसिद्ध्यर्थं

6a पुत्रपौत्राभिवृद्ध्यर्थं अपमृत्यु परिहारार्थं आयुष्या-

भिवृद्ध्यर्थं जन्मान्तर सर्पवध दोषनिवारणार्थं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

इह जन्मनि बाल्य यौवन कौमार वार्धिकेषु ज्ञानतोपि वा
अज्ञानतोपि वा सर्पस्यवध दोष निवारणार्थं नेत्ररोग
कुष्टरोग महाव्याधि निवारणार्थं अयुरारोग्य बल-
पुष्ट्यादि सकलमनोरथावाप्त्यर्थम्। जन्मनक्षत्र
जन्मराश्यपेक्षया। नामनक्षत्र नामराश्यपेक्षया जन्मकर्म
यान सांघातिक सामुदायक वैनाशिक षण्णक्षत्रवशात्।
लग्न होर द्रेक्काण नवांश द्वादशांश त्रिंशनवशात् जन्मानु-
66 जन्म त्रिजन्मगोचाराष्टकवर्ग रूप कफल भागवशात्।
महादशान्तर्दशा अन्तर्दशा सूक्ष्मदशा वशात्।
अंगग्रह भावग्रह उपग्रह सूक्ष्मग्रह वशात्। लतावेध-
वशात् क्रूर ग्रहवशात् कालचक्रवशात्। सर्वतो-
भद्रचक्रवशात्। संपर्कवशात्। ये ये ग्रहाः शुभ-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

-फलावाप्त्यर्थं आद्यात्मिक अधिदैविक अधिभौतिकता-
-पत्रय निवृत्यर्थं दुस्स्वप्न दुश्शकुन अद्भुतदर्शनादि
सकल दोष निवृत्यर्थं धन कनक रत्न वस्तु वाहनादि अष्टैश्व-
र्याभिवृद्ध्यर्थं पशु बाहुल्य सिद्ध्यर्थं परैः क्रियमाण करिष्य-
माण मन्त्र यन्त्र तन्त्र विष चूर्ण प्रयोगादि जनित सर्वोपद्रव
शान्त्यर्थं महदैश्वर्याभिवृद्ध्यर्थं सर्वाभीष्टप्रदायका
नागप्रतिष्ठा कर्मणि आचार्य मुखेन कर्म करिष्ये।

॥ शुभमस्तु ॥

" हरिः ओम् "

—— x ——

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

7a

[:]
संकल्पम्
# ॥ आचार्यादि वरणम् ॥

शुभतिथौ मया आचरित सोमवार अमा[वा]स्य व्रत

कल्पोक्त संपूर्ण सकल फलावाप्त्यर्थं सर्वाभीष्ट सिद्ध्यर्थं

अस्वत्थ ब्रह्म विष्णु रुद्र देवता मध्यस्था अश्वत्थ देवता

प्रीत्यर्थं भविष्योत्तर पुराणोक्त प्रकारेण संभावित नियमेन

संभावित द्रव्यैः सोमवार अमावास्या व्रतोद्यापन कर्म करिष्ये।

अस्मिन् सोमवार अमावास्या व्रतोद्यापन कर्मणि

सकलकर्म कारयितुं रुद्रकलशाराधन अधिदेवता

प्रत्यधि देवता तत्प्रतिमा पूजन तन्मन्त्र जप होमाभिषेक

तत्कल वस्त्र प्रतिमा प्रतिग्रहार्थं आचार्यं त्वां वृणीमहे। २

अस्मिन् सोमवार अमावास्य व्रतोद्यापन कर्मणि

देवि कलशाराधन प्रतिमापूजन कलश वस्त्र प्रतिमा प्रतिग्र-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

-हार्थं ऋत्विजं त्वां वृणीमहे । 2.

78 अस्मिन् सोमवार अमास्य[व्र] व्रतोद्यापन कर्मणि विष्णु-

कलशाराधन प्रतिमापूजन कलशवस्त्र प्रतिमा प्रतिग्रहार्थं

ऋत्विजं त्वां वृणीमहे । 3

अस्मिन् सोमवार अमास्य[व्र] व्रतोद्यापनकर्मणि लक्ष्मिकलशा-

राधन प्रतिमापूजन कलशवस्त्र प्रतिग्रहार्थं ऋत्विजं त्वां

वृणीमहे । 4

अस्मिन् सोमवार अमास्य[व्र] व्रतोद्यापन कर्मणि ब्रह्मकलशा-

राधन कलशवस्त्र प्रतिमा प्रतिग्रहार्थं ऋत्विजं त्वां वृणीमहे । 5

अस्मिन् सोमवार अमास्य[व्र] व्रतोद्यापनकर्मणि सरस्वतिकल-

शाराधन प्रतिमापूजन कलशवस्त्र प्रतिमाप्रतिग्रहार्थं

ऋत्विजं त्वां वृणीमहे । 6.

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अस्मिन् सोमवार अमावास्य व्रतोद्यापन कर्मणि इन्द्र

कलशाराधन कलशवस्त्र प्रतिमा प्रतिग्रहार्थं ऋत्विजं

त्वां वृणीमहे । 7.

अस्मिन् सोमवार अमा[वा]स्य व्रतोद्यापनकर्मणि अग्निकल-

शाराधन प्रतिमाप्रतिग्रहार्थं ऋत्विजं त्वां वृणीमहे । 8.

अस्मिन् सोमवार अमा[वा]स्य [व्रतोद्यापन कर्मणि] यमकलशा-

राधन प्रतिमा पूजन प्रति ग्रहार्थं ऋत्विजं त्वां वृणीमहे । 9.

? २० अस्मिन् सोमवार अमा[वा]स्य व्रतोद्यापन कर्मणि निऋति

कलशाराध प्रतिग्रहार्थं ऋत्विजं त्वां वृणीमहे । 10

अस्मिन् सोम - उद्या- कर्मणि वरुण कलशाराधन

प्रतिमाग्रहार्थं ऋत्विजं त्वां वृणीमहे । 11.

अस्मिन् -[सोम-] वायुकलशाराधन प्रतिमा ऋत्विजं त्वां वृणीमहे 12

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अस्मिन् कुबेरकलश । ||13||

अस्मिन् ईशानकलश । ||14||

अर्घ्य

॥ अर्घ्यमन्त्रम् ॥

आयुर्बलं यशोवचः प्रजा पशु वसूनि च ।

ब्रह्म यशश्च मेधाश्च त्वन्नो देहि वनस्पते ॥

ब्रह्मविष्णुशिव स्वरूपाय वृक्षराजाय ते नमः ।

इदमर्घ्यम्

गन्ध तण्डुल चूर्णेन मधुना च सुगन्धिना ।

अर्पयामि महादेव मत्सन्तति समृद्धये ॥

२६ मधुगन्ध तण्डुलेन......| नलेपनम् ।

आयुर्बलं यशोवचः प्रजापशु वसूनि च ।

ब्रह्म यशश्च मेधाश्च त्वन्नो देहि वनस्पते ।

द्वादशार्घ्यप्रदानम् - १२

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ओं तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदु-
यात्। रुद्रगायत्रि । 1.

विष्णुगायत्रि – नारायणाय विद्महे वासुदेवाय धीमहि
तन्नो विष्णु प्रचोदुयात् । २.

ओं हं सद्यजाय विद्महे कूर्च हस्ताय धीमहे तन्नो ब्रह्म
प्रचोदुयात् । ३.

मूलतो ब्रह्मरूपाय मध्यान्ता विष्णुरूपिणे ।
अग्रत शिवरूपा वृक्षराजाधिते नमः॥

त्वयानिमित्तेन मयाकृतेन अनेन पुण्येन पुण्यवान्भव ।
प्रीतिमां सिद्धिसंयुक्तां प्राप्तारिष्ट निवर्तये ॥

फ
ऋश्यन्दास्यामि विप्रेन्द्र यथोक्त भलदो भव ।
अस्मिन् ब्राह्मणाय उमामहेश्वर स्वरूपाय उमामहेश्वर-
प्रीतिं कामयमानः ऋश्यमिदं सम्प्रदुते नमम ।

——x——

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

7a + NO120.

२5भम स्तु

सिद्धान्तदीपिका[ग्राम]

। नागप्रतिमा ॥

श्रुणु देवी प्रवक्ष्यामि शेषस्थापनमुत्तमम् । कन्नग

धन्यं यशस्करश्चायुर्वर्द्धनं सर्व सौख्यदम् ॥

अपमृत्यु विनाशार्थं सर्वरोगमवारणम् ।

सर्वाभीष्ट प्रदं नृणां पुत्र पौत्रौ विवर्द्धनम् ॥

वन्ध्यानां मृतवत्सानां विशेषात्पुत्रदं हितत् ।

जन्मान्तरे सर्पवधात् नेत्ररोगादि नाशनम् ॥

कुष्टरोगादि रोगानां नाशदं सर्वदेहिनाम् ।

इह जन्मनि सर्पस्य वधदोषनिवारणम् ॥

बाल्ये वयसि कौमारे वार्धक्ये ज्ञानतोऽपिवा ।

अज्ञानतोवासर्पस्य वधदेषनिवारणम् ॥

ग्रह वेध्यादि दोषघ्नं सर्वदोष निवारणम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कोल्ल.

उत्तरायण काले च दक्षिणायन गोरवौ ॥

चैत्रे वैशाखमासे च फाल्गुने वा विशेषतः।

मूढदोषादि रहिते मासि भाद्रपदे तथा ॥

1b श्रावणे वा चाश्वयुजि कार्त्तिक्यां/वा विशेषतः।

शुक्लपक्षे विशेषेण कृष्णोत्वापञ्चमी दिनात् ॥

पञ्चमी नागराजस्य नागानां शान्ति वर्द्धनी।

पञ्चम्यां किल नागानां भवन्ति ह्युत्सवो महान् ॥.

पञ्चम्यामेव कर्तव्या प्रतिष्ठा फल दायिनी।

चतुर्थ्यां वाथ षष्ठ्यां वा ब्रह्म गौरीदिनेथवा ॥ 10

भृगिबिन्दु गुरु सौम्यानां वारास्तत्फल दायकाः।

सोम सर्पमघास्विन्द्र विष्णुवारुण रौ..... णाः ॥

[ति] [ज्ञ]
जय वा चोत्तमा सेषु सर्परक्षे तिशेतः। ?

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

चन्द्र तारा बलयुते दंपत्योश्शुभवासरे ॥

नागप्रतिष्ठां कुर्वीत न्युक्ताये स्त्रियै न्नरद्वयोः ।

सकलस्य चरश्श्रेष्ठो निष्कलस्य स्थिरश्शुभः ॥

उभयोरुभयोश्श्रेष्ठो नागस्यैव चरश्शुभः ।

शिलाभिर्दारुभिर्वापि स्वर्णद्रुवर्णताम्रकैः ॥ उपादानं

2a फणामण्डलशोभाढ्यं कारयेत् सर्पनायकम् ।

ब्राह्मणक्षत्र विट्शूद्राः स्त्रियोऽप्यन्य जातयः ॥ चातुर्वर्ण्य ~~[illegible]~~ ~~[illegible]~~ स्वेन शिलाः

अभीष्टफलसिद्ध्यर्थं शेषस्थापनमाचरेत् ।

श्वेता रक्ता तथा पीता कृष्णा शैल चतुर्विधा ॥

ब्राह्मणादीक्रमेणैव संग्राह्यात् शिलाश्शुभा ।

अभावे सर्ववर्णानां कृष्णाशैला प्रशस्यते ॥

दशताल प्रमाणेन ब्राह्मणानां विधीयते । प्रमाणं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नवतालं क्षत्रियाणां वैश्यानां अष्टतालकम् ॥

षट्तालञ्चैव शूद्राणां तत्तद्दस्त प्रमाणतः ।

हस्तमात्र शिलाष्ठा तस्याभागो विधीयते ॥

तदुर्ध्वाद्द्ये मा प्रोक्तात्वधमात्र न विद्यते ।

एकायामपि शैलायां सपीठा नागदेवता ॥

सर्वलक्षण शोभाड्या तत्त तालप्रमाणतः । एकवक्त्रद्विवक्त्रादि भेदः

एकवक्त्रं पञ्चवक्त्रं द्विवक्त्रं वापि कल्पयेत् ॥

२८ एकवक्त्रं पञ्चवक्त्रं नागं वै मण्डलाकृतिम् ।

कुर्यात्फणान्तरे लिङ्गं केवलं वा फणान्वितम् ॥

अन्योन्य मुख संयुक्तं द्विवक्त्रमिति कीर्तितम् ।

द्वाभ्यञ्चैव तु नागाभ्यां वेष्टनञ्च द्विवक्त्रकम् ॥

पञ्चवक्त्रं त्रिवक्त्रं वा फणामण्डलया सह ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ब्राह्मणानां पञ्चवृत्तं इतरैर्वा त्रिवृत्तकम् ॥

अन्योन्य मुख संयुक्ता नागराजो शिलामये।

वृत्तं प्रति च पद्मं स्यात् शिवलिङ्गं फणान्तरे ॥

पद्मं वाऽपि प्रकर्तव्यं केवलं वाऽपि सर्वशः।

दोषपापक्षयार्थी तु पद्मं वा केवलन्तु वा ।

पुत्रार्थी चैव मोक्षार्थ लिङ्गं पद्मास्य कल्पयेत्।

शिलादैर्घ्यं पञ्चकृत्वा द्विभागेन च विस्तृतिः ॥

विस्तृतिं पञ्चधा भज्य द्विभागेन घनं भवेत्।

अन्यथा शिलया पीठं दीर्घस्यैव त्रिभागतः।

३१ एकभागेन पीठोक्तमार्गेणैव तु शिल्पिना ।

कारयित्वा यथान्यायं मृदुभावेन शोधयेत् ॥

पलाश खादिराश्वत्थ वट खादिर बिल्वजैः। दारुनिर्मितनागाः

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

एभिस्तु तरुभिर्नागं कुर्याद्धौलोकवर्त्मना ॥

निष्कादि दश निष्कान्तं हेम्ना वाऽपि सलक्षणा । लोहनिर्मितनागाः

दशादि शत निष्कान्त रौप्येणापि विकल्पिता ॥

पलादितिथि संख्यान्ततात्रेणापि विनिर्मिता ।

प्रतिमा स्वार्थकृत्येषु दानेषु विधीयते ॥

शिलाभिर्दारुभिर्या तु सा परार्थे विधीयते ।

एवमेव क्रमेणैव नागंकुर्याद्यथा विधि ॥ —

शिवालये नदीतीरे पिप्पलस्य च सन्निधौ । स्थापनप्रदेशः

शिवालये विशेषेण काम्यार्थस्य सिद्धये ॥

नद्यादौ दोष शान्त्यर्थं स्थानमेवं विधीयते ।

आलये मण्डपादौ तु प्राकारे वा विशेषतः ॥

36 द्विव्य वृक्षस्य मूले तु परिवारालयेषु च ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

॥ वेदागम प्रमाणम् ॥

वर्णभेदेन मन्त्रभेदः

स्थानमेवा समाख्यातं मन्त्रभेदमथ श्रुणु।

वैदिकं ब्राह्मणानान्तु दीक्षितानान्तु मिश्रकम् ॥

राज्ञां वैदिक तान्त्रान्तु वैश्यानान्तु तथैव च।

तान्त्रकं शूद्रजातीनां स्वार्थकृत्ये स्ववेश्मनि ॥

परार्थे सर्ववर्णानां आगमोक्त प्रकारतः।

वेदोक्तं ब्राह्मणानान्तु स्वार्थे चैव स्वपूजने ॥

इतरेषान्तु सर्वेषां स्वगृह्योक्त प्रकारतः।

तत्तदात्मार्थ यजने ह्येवमेवं समाचरेत् ॥

परार्थेष्वागमेषूक्त मन्त्रैश्च निगमोद्भवैः।

मिश्रीकृत्य क्रियायत्र तत्र साचागम क्रिया ॥

तस्मात्परार्थ यजने कुर्यादागम मार्गतः।

यदा परार्थं विप्रैस्तु कर्तव्यं काम्य मार्गतः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तदावैत्वादिशैवेन कारयेन्निर्गमोद्भवैः।

4a वैदिकैरागमैर्मन्त्रैः स्थापयेत्तु यथा विधि॥

।आत्मार्थं परार्थं॥

विप्रक्षत्रिय विट् शूद्रा दीक्षिताश्च प्रवेशकाः।

आत्मार्थं पूजयेन्नित्यं नकुर्यात्तु परार्थकम्॥

आदिशैवेन कर्तव्य आत्मार्थञ्च परार्थकम्।

स्वे स्वे गृहे यदा बिम्बं वैदिकोक्त प्रकारतः॥

संस्थाप्य सर्वदा पूज्यं परार्थेनापि वैदिकैः।

दीक्षितानाञ्च शूद्राणामागमोक्त प्रकारतः॥

नागराजञ्च विधिवत् कृत्वा स्थापनमारभेत्।

आचार्यं वरयेत्पूर्वं ऋत्विजस्तदनन्तरम्॥

।आचार्यादि लक्षणम्॥

आदौ शैव कुलोद्भूतं दीक्षितं वेदपारगम्।

सर्व शास्त्र विचारज्ञं ज्ञानयोग विशारदम्॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

क्रियापादेषु कुशलं सर्वावयव सुन्दरम् ।

4b ऋत्विजस्तत्कुलोद्भूता नष्टौ शैवाब्धिचक्षणान् ॥

जापकान् शैव संभूतान् वैदिकान् वेदपारगान् ।

अष्टावष्टौ तु वरयेच्चयेच्छं वा स्व शक्तितः ॥

एवं वै वरयेत्कर्ता उपोष्यव्रतमाचरेत् ।

॥ यागशाला ॥

देवाग्रेचोत्तरे वाऽपि त्वैशान्यां वा विशेषतः ।

नवहस्त प्रमाणेन मण्डपं चतुरश्रकम् ।

षोडशस्तंभ संयुक्तं द्वादशस्तंभमेव च ॥

चतुर्द्वार समायुक्तं चतुस्तोरण भूषितम् ।

वितानध्वज संयुक्तं दर्भमाला समन्वितम् ॥

कूटं वापि प्रपाकारं मण्डपं कारयेत्सुधीः ।

मण्डपत्रवधा भज्य मध्यभागे तु वेदिकाम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

॥ कुण्डानि ॥

5a अरत्निमात्र संयुक्तं दर्पणोदुर सन्निभम् ।
उपवेदि समायुक्तां पूर्वोक्त यथा विधि ॥
नवाग्न्या यतनं वापि पञ्चाग्न्यायतनन्तु वा ।
एकाग्न्यायतनं वापि कुर्यात्पूर्वोक्त वर्त्मना ॥
नवाग्न्यायतने सर्वं पद्माकारन्तु कुण्डकम् ।
पुरन्दरे शयोर्मध्ये वृत्तकुण्ड विधानकम् ॥
अथवा तु चतुर्दिक्षु चतुरश्रं विदिक्षु च ।
पद्मकुण्डं प्रधाने तु वृत्तं वा चतुरश्रकम् ॥
पञ्चाग्न्यायतने दिक्षु पद्मवृत्त प्रधानकम् ।
एकाग्न्यायतने पूर्वे वृत्तं वा चतुरश्रकम् ॥
कुण्डं कृत्वा विधानेन गोमयेनानुलेपयेत् ।
ततः शिल्पिनमुद्वास्य पुण्याहं वाचयेत्ततः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अंकुरार्पणं पूर्वं पूर्वोक्तविधिमार्गतः।

वास्तुशान्तिं ततः कृत्वा मण्डपं तेन वह्निना॥

॥(रत्नन्यासः) नयनोन्मीलनम्, नेत्रशुद्धिः॥

5b शुद्धिं कृत्वा तत सम्यक् पुण्याहं वाचयेद्गुरुः।

नयनोन्मीलितार्थाय त्वन्य देवेश मण्डपे॥

स्थण्डिलद्वितयं कार्यं एकत्रैवाधि देवताम्।

आवाह्य गन्धपुष्पाद्यै रभ्यर्च्य च यथाविधि॥

तन्मध्ये नागराजन्तु श्वेतवस्त्रोपरिन्यसेत्।

स्वर्ण सूच्यादिना शिल्पि नयनोन्मीलने तदा॥

आचार्य उद्धरन्मन्त्रं शिल्पिनेत्रस्य मोक्षणम्।

कुर्यात्पटावृतं बिम्बं अन्येन निरीक्षिपेत्॥

ज्योतिर्मण्डलमालिख्य कृष्णमण्डलमालिखेत्।

शिल्पिनं पूजयेत्तत्र वस्त्राद्यैश्च स्वशक्तितः॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

इतरस्थण्डिले बिम्बं संस्थाप्य च गरुत्मतः।
6a सौवर्णा दूर्वया नेत्रं लिखेत्पूर्वाननस्तदा ॥
नेत्रमन्त्रं समुच्चार्य स्पृशेन्नेत्रं जपेन्मनुम्।
दुग्धाज्यमधुधान्यानि पञ्चब्रह्ममनुंस्मरन् ॥ पञ्चामृत
दुग्धमाप्यायेति मन्त्रेण घृतं वै घृतमन्त्रतः।
मधुवातेति मधु च त्विदं विष्णवेति धान्यकम् ॥
ब्रह्मजज्ञानमन्त्रेण ब्राह्मणान् दर्शयेत्सुधीः।
गौर्धेनुर्भव्यमन्त्रेस वत्सां गां प्रदर्शयेत् ॥
सुमंगलीति मन्त्रेण कन्निकां दर्शयेत्ततः।
संशोध्य मृज्जलाभ्यान्तां प्रक्षाल्य पयसा ततः॥
शुद्धजलैस्तु संशोध्य ततगायत्र्याभिषेचयेत्।
हृदा संपूज्य नागेन्द्रं पञ्चब्रह्ममनुस्मरन् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वस्त्रकूर्चेन संवेष्ट्य गन्धपुष्पादिभिर्यजेत् ।

ग्रामप्रदक्षिणं कृत्वा स्वस्ति सूक्तसमन्वितम् ॥

जलाशयन्ततः प्राप्य जलमध्ये प्रपां कुरु ।

6b तन्मध्ये । शा चाययेद्बिंबं नाग दुग्ध जलैस्ततः ॥ जलाधिवास

तीरे च स्थण्डिलं कृत्वा इन्द्रादीन् पूर्ववत् प्रजेत् ।

आचार्यस्सह ऋत्विग्भिर्नागं स्पृष्ट्वा जपेत्तथा ॥

मूलब्रह्मांग मन्त्रैश्च दिक्पालाश्च मन्त्रतः ।

अनन्तादि महानाग मन्त्रान् गायत्र्या सह ॥ गायत्रि

अष्टोत्तर शतं जपित्वा ऋत्विग्भिर्ब्राह्मणैस्सह ।
॥ आद्योच्चारः॥
आद्योच्चारेण मन्त्रेण त्वेकवारं जपेत् ॥

इदं सर्पेभ्य मन्त्रेण नमोस्त्विति मन्त्रतः ।

आद्य श्री भूमि सूक्ताश्च सौरं मृत्युञ्जयं तथा ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वेदादिमन्त्रं स्कन्दस्य सूक्तं वै पुरुषसूक्तकम्।

जपं समाप्य पश्चात्तु याममात्रावसानके॥

जलादुत्तीर्य बिम्बन्तु वस्त्रकूर्चं व्यपोह्य च।

कुम्भाद्भिः प्रोक्षयेत्पश्चात् दृन्यवस्त्रेण वेष्टयेत्॥

अभ्यर्च्य गन्धपुष्पाद्यैर्नैवेद्यन्तु निवेदयेत्।

7a प्रदक्षिणक्रमेणैव यागशालां प्रवेशयेत्॥

रक्षाबन्धं ततः कृत्वा पूर्वोक्तविधिनाऽऽगुरुः।

वेद्यूर्ध्वे स्थण्डिलं कृत्वा चाष्टद्रोणैश्च शालिभिः॥

दण्डैस्तण्डुलैश्चैव तदर्धैश्चानिलैरपि।

सप्तधान्यैश्च लाजैश्च दर्भैश्चैव परिस्तरेत्॥

पञ्चवर्णसमायुक्तं वस्त्रं तस्योपरिन्यसेत्।

तन्मध्ये शाययेद्बिम्बं प्राक्शिरश्चोर्ध्ववक्त्रकम्॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

आन्वादि गरुपर्यन्तमर्चनोक्तां समाचरेत् ।
अभ्यर्च्य गन्धपुष्पाद्यैर्नैवेद्यान्तं समाप्य च ॥
नागस्यैव शिरोदेशे प्रधानं द्रोणपूरितम् ।
नवरत्न समायुक्तं चूतपत्रैरलंकृतम् ॥
वस्त्रयुग्मेन संवेष्ट्य वेदिमध्ये तु विन्यसेत् ।
तस्याग्रे शिवलिङ्गस्य फणामध्य स्थितस्य च ॥
18 विन्यसेत्कुम्भमेकन्तु पूर्वोक्तेनैव वर्त्मना ।
तस्याग्रे नाग राजस्य बिम्बं निष्कसुवर्णकैः [म.] ॥
कृत्वा कुंभस्य चाग्रे च वस्त्रोपरि च विन्यसेत् ।
परितः कलशानष्टौ सुसूत्रात्सविधानकान् ॥
सवस्त्रान् हेमसंयुक्तान् कूर्चपल्लवसंयुतान् ।
सरत्नान् प्रतिमायुक्तान् सर्वलक्षण संयुतान् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

इन्द्रादीशान पर्यन्तं दुलाश्रे विन्यसेत्क्रमात् ।

मध्ये कुम्भे शेषराजमिन्द्रादिषु यथाक्रमम् ॥

अनन्तवासुकिं तक्षं कार्कोटं पद्ममेव च ।

महापद्मञ्च शंखञ्च गुलिकञ्च यजेद्गुरुः ॥

मध्ये शान्त्यादि शक्तिपर्यन्तं आसनमूर्तिमूलकम् ।

शेषराज महाकायं सर्वश्रेष्ठ प्रदायकम् ॥

वक्त्रद्वय समायुक्तं फणामण्डलमण्डितम् ।

सर्वरत्नमयं शान्तं षट्कला सहितं प्रभुम् ॥

8 a ध्यायामि कुम्भमध्येतु सर्वाभीष्ट प्रसिद्धये ।

पञ्चभूतञ्च पञ्चास्यं वेदशास्त्रं वपुस्तथा ॥

कला दन्ताश्च जिह्वाश्च मारीताग्नि सुनासिकौ ।

कर्णौ कुबेर नैरित्यौ चरणानीति चन्द्रमाः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पुच्छं समस्त देवाश्च शेषरूपं शुभात्मिकम् ।

एवं ध्यात्वा विशेषेण कुम्भमध्ये प्रपूजयेत् ॥ ✓

इति तन्मूलमन्त्रेण तद्गायत्र्या योजयेत् ।

प्रणवं पूर्वमुच्चार्य त्वष्टवर्गस्य चादिकौ ॥

आदिवर्ग द्वितीयेन तच्चतुर्दश संयुतम् ।

बिन्दुनादु समायुक्तो शेष राजस्य मन्त्रकम् ॥

आवाहयेत्ततो धीमान् तत्सद्यादि क्रमेण तु ।

स्थापनं सन्निधानञ्च सन्निरोधनमेव च ॥

अवकुण्ठयन्धेतोश्च मुद्राश्चैव प्रदर्शयेत् ।

पाद्यञ्च पादयोर्दद्यात् मुखेष्वाचमनं तथा ॥

86 अर्घ्यञ्च शिरसो दद्यात् नमस्वाहा स्वधान्तकैः ॥

मूलेन गन्ध पुष्पञ्च नैवेद्यन्धूपदीपकम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कृत्वा सर्वोपचारैश्च पूजयेद्विघ्ननायकम् ।

पञ्चब्रह्म षडंगैश्च तत्तत्स्थाने न्यसेद्गुरुः ॥

अक्षराणि न्यसेन्मूलं मन्त्रेणैवाञ्जलिद्वयम् ।

दत्वा तु धूपदीपान्तं अभीष्टं प्रार्थयेद्गुरुः ॥

शान्त्यादि शक्तिपर्यन्तं सांगं संपूजयेच्छिवम् ।

धूप दीपादि नैवेद्य रुपचारैर्यजेच्छिवम् ।

पूर्वाद्यारभ्य चैशान्तं अष्टनागान् प्रपूजयेत् ॥

पूर्वे ओं ह्रां अनन्तासनाय नमः । ओं हां अनन्तमूर्तये नमः ।

9a रत्नकुण्डलकेयूर/किरीटि मकुटान्वितम् ।

स्वर्णच्छायाद्विहस्तञ्च ध्यानन्तेशन्नमाम्यहम् ॥

ओं हां अनन्ताय नमः । इत्यावाहनादि सर्वोपचारैस्संपूज्य ।

आग्नेये ओं ह्रां वासुकी आसनाय नमः । ओं हां वासुकी-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

-मूर्तये नमः।" प्रसन्नवदनप्रख्यं सुकुमारं सुयौवनम्।
फणामणिसु शोभाढ्यं वासुकिन्तंनमो नमः॥
ओं ह्रां वासुकि नमः। इत्यावाहनादि सर्वोपचारैस्संपूज्य।
याम्ये ओं ह्रां दुक्षकासनाय नमः। ओं ह्रां तक्षकमूर्तये नमः।
इन्द्रादित्य सुखं रु तिलग्रीवांग भूषणम्।
माणिक्य मौक्तिक निभं तक्षकन्तमहं यजे।
16 ओं ह्रां तक्षकाय नमः। इत्यावाहनादि सर्वोपचारैस्संपूज्य।
निरृत्ये। ओं ह्रां कार्कोटकासनाय नमः। ओं ह्रां
कार्कोटकमूर्तये नमः।
तेजोराशि समाकीर्णं विषज्वाला मुखोद्धृतम्।
कृष्णवर्णं द्विबाहुञ्च कार्कोटकमनुस्मरन्॥
ओं ह्रां कार्कोटकाय नमः। इत्यावाहनादि सर्वोपचारै-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

-स्संपूज्य । वारुणे । ओं हां पद्मासनाय नमः । ओं हां

पद्ममूर्तये नमः ।

विशालाक्षं गदाहस्तं अंबुदाकारयच्चसम् ।

पीनोरूचारु वक्षाढ्यं पद्मं संसेव्यतामहम् ॥

ओं हां पद्माय नमः इत्यावाहनादि सर्वोपचारैस्संपूज्य ।

10a वायव्ये । ओं हां महापद्मासनाय नमः । ओं हां महापद्म-

मूर्तये नमः ।

गदाहस्तं विशालाक्षं कर्णोद्धृतविषाकुलम् ।

सौम्यं द्विहस्त सशुभ्रं महापद्मं यजेत्सुधीः ॥

ओं हां महापद्माय नमः इत्यावाहनादि सर्वोपचारैस्संपूज्य ।

कुबेरे । ओं हां शंखपालासनाय नमः । ओं हां शंख-

पालमूर्तये नमः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

त्रिशूलभय पाणिञ्च स्वर्णवर्णं किरीटिनम् ।

सर्वलंकार शोभाढ्यं शंखपालं नमाम्यहं ॥

ओं ह्रां शंखपालाय नमः। इत्यावाहनादि सर्वोपचारैस्संपूज्य।

ईशाने। कुलिकासनाय नमः। ओं ह्रां कुलिकमूर्तये नमः।

कुब्जं कुम्कद कुन्दाभं मुखे दीर्घ विषानलम् ।

106 नाणाकारं द्विनासिनं कुलिकं नन्नमाम्यहम् ॥

ओं ह्रां कुलिकाय नमः। इत्यावाहनादि सर्वोपचारैस्संपूज्य।

एवमष्टसु कुम्भेषु पूजयेद्बीज पूर्वकम् ।

पञ्चवर्गस्य चान्तन्तु द्विषट् वर्गद्वितीयकम् ॥

तस्य वर्गस्य चान्तन्तु द्विवर्गस्य द्विबीजकम् ।

पञ्चवर्ग तृतीयन्तु त्वष्ट वर्गत्रितीयकम् ॥

द्विवर्गस्य द्वितीयन्तु ह्यन्तवर्ग चतुर्थकम् ।

अनन्ताद्य ष्ट नागानां बीजैस्संयोजयेद्गुरुः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

आवाहनादि पूजान्तं नैवेद्यं धूपदीपादिकम् ।
क्रमेण विधिवद्दत्वा तृतीयावरणे ततः ॥
धर्मादि देवानष्टौ चतुर्थावरणे यजेत् ।
कृतादि देवानष्टौ च त्विन्द्रादीन्पञ्चमावृतौ ॥
॥१ पञ्चान्नन्तु निवेद्याथ पायसापूपसंयुतम् ।
मधुप्लुतं प्रियंगोश्च पिष्टञ्चैव निवेदयेत् ॥
धूपदीपादिकं दत्वा प्रार्थयेद्घोषनायकम् ।
ऋगादध्ययनं दिक्षु कुर्युर्वै द्विजसत्तमाः ॥
अस्त्रजेपं विदुद्क्षे च कुर्युश्शैवार्थपारगाः ।
अन्तरालेषु सर्पस्य सूक्तं पुरुषसूक्तकम् ॥
श्रीसूक्तञ्चैव भूसूक्तं क्रमादेवं जपेत्पृथक् ।
शतमर्द्धं तदर्धं वा द्विजं प्रतिविशेषतः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ततः कुण्डाग्निकं गत्वा सामान्यार्घ्यं करोद्गुरुः।

आधानादि विवाहान्तं अग्निकार्योक्तमाचरेत्॥ होमं

अग्नौ सावरणं शेषं समभ्यर्च्य गुरूत्तमः।

नाडि सन्धान मार्गेणात्वैक्यभावं प्रगृह्य च॥

नान्या यतनं चापि पश्चाग्न्यायतनन्तु वा।

पालाशोदुम्बराश्वत्थ वटाः प्रागादिषु क्रमात्॥

॥६ शमीखादिर बिल्वार्क वितृक्षु च यथा क्रमम्।

प्रधाने तु पलाशन्तु पश्चाग्न्यायतने तथा॥

पालाशश्च शमी पूर्वे यज्ञांगं खादिरं यमे।

पश्चिमेश्वत्थ बिल्वौ च वटार्कौ चोत्तरे तथा॥

पलाशन्तु प्रधाने तु होमकुण्डन्तु सर्वशः।

शतत्रयं तदर्धं वा कुण्डं प्रति तदर्धकः॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शेषादिनान्तु सद्येन तत्कुण्डेषु होमयेत्।
शेषादिनान्तु मूलेन आज्यन्तु जुहुयात्क्रमात्॥
तत्ताम्मूलेन लाजन्तु तद्वामेन प्रियंगुकम्।
तद्वामेन तिलं हुत्वा सिद्धार्थं सर्षपं क्रमात्॥
12a पायसं पत्नेन चास्त्रेण प्रीतिकुण्डं हुनेत्क्रमात्।
माषञ्च शिरसा हुत्वा मुद्गं वै हृदयेन तु॥
कुलसं मूलमन्त्रेण शिम्बं नेत्रेण होमयेत्।
व्रीहिमीशानमन्त्रेण यवं वै चास्त्रमन्त्रतः॥
शिखामन्त्रेण शालिञ्च निवारञ्चास्त्रमन्त्रतः।
गोधूममाढकी शिरसं व्रीहिं वै चणकन्तथा॥
श्यामकञ्चैव निष्पावं वेणुन्दधीच मूलतः।
पयश्चैव ञ्च कस्तूरीं चन्दनं चन्द्रकान्तकम्॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तथा-

गोरोचनं कुङ्कुमञ्च कृष्णागन्धं हिमाम्बुकम् ।

ह्रीबेरञ्च मदद्वन्द्वं गुग्गुलुश्चैव मूलतः ॥

इक्षुखण्डं स्विदुकन्दुं फलानि हृदयेन तु ।

सक्तापूपस्य निचयान् जुहुयात्कवचेन तु ॥

128 पृथुकं नालिकेरञ्च शिखामन्त्रेण होमयेत् ।

गुलान्नञ्चैव शुद्धान्नं माषान्नं कवचेन तु ॥

मुखवास समायुक्तां ताम्बूलं मूलमन्त्रतः ।

एतानि होमद्रव्याणि जुहुयात्तु शतत्रयम् ॥

शतमर्धं तदर्धं वा तदर्धं वा विशेषतः ।

आद्योच्चारेण मन्त्रेण समिदादीन् प्रधानके ॥

येनान्तरिक्षं पृथिवीत्याज्येनैव होमयेत् ।

स तिलाज्यैश्च सर्पेभ्य स्वाहेति तदनन्तरम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पलाशं दन्तस्कन्देभ्यः स्वाहेति च ततः परम्।

पक्वमन्नं तद्द्वारश्लेषाभ्य स्वाहेति ततो गुरुः॥

13a गन्धूच्यपूपलाजश्च सर्पसूक्तेन होमयेत्।

अष्टोत्तरसहस्रं वा त्वष्टोत्तरशतन्तु वा॥

समिभिश्चरुमाज्येन प्रत्येकं जुहुयात्पुनः।

नमो अस्त्विति मन्त्रेण त्वाज्येनैव शताहुतिम्॥

हुत्वा पूर्णाहुतिं कुर्यात् परिषिच्य बलिन्दद्देत्।

मूर्तिपा स्वस्वकुण्डेषु पूर्णाहुत्यादिमाचरेत्॥

आचार्यो मूर्तिपैस्सार्धं पञ्चगव्यादिकं पिबेत्।

रात्रिशेषं व्यपोह्याथ प्रभाते मूर्तिपैस्सह॥ द्वितीये हनि कर्म

स्नानादि नित्यकर्मान्तं कर्म निर्वर्त्य पूर्ववत्।

यागपूजाञ्च होमञ्च सर्वं पूर्ववदाचरेत्॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मूलब्रह्मांगमन्त्रैश्च जुहुयात्तदनन्तरम् ।
शिवास्त्रेण शतं हुत्वा पूर्वादिषु यथाक्रमम् ॥
पाशुपतेन चास्त्रेणाघोरास्त्रेण च गुरुः ।
136 प्रत्यंगिरेण चास्त्रेण क्षुरिकास्त्रेण होमयेत् ॥
शेष गायत्रि मन्त्रेण प्रत्येकं शत संख्यया ।
हुत्वा पूर्णाहुतिं पश्चात् जयादि परिषेचनम् ॥
कृत्वा त्वग्निस्थ शेषञ्च कुम्भस्थे योजयेद्गुरुः ।
शयनात् बिम्बमुत्थाप्य अभिषेकः समाचरेत् ॥
ग्रामप्रदक्षिणं कृत्वा आलयादौ निवेशयेत् ।
बिम्ब पीठे तु रत्नानां न्यासं कृत्वाष्ट बन्धनम् ॥
पञ्चगव्येन संस्थाप्य पवमानमुदीरयन् ।
अक्षराणि न्यसेत्पश्चात् पञ्चावरणमार्गतः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अभ्यर्च्य गन्ध पुष्पाद्यै र्नैवेद्यान्तं समाप्य च ।

मुहूर्ते समनुप्राप्ते यागशालां प्रवेश्य च ॥

14a आचार्यो यजमानेन प्राङ्मुखोदङ्मुखोपि वा ।

उपविश्य च संकल्प्य ऋत्विक्भिर्ब्राह्मणैस्सह ॥

यात्रादानं ग्रहप्रीति दानञ्च दश दानकम् ।

यथा शक्त्यात् दत्वा च आचार्यो मूर्तिपैस्सह ॥

कुम्भांश्च वाहयित्वाथ त्वालयस्य प्रदक्षिणम् । अभिप्रेत्य

कृत्वा शेष समीपञ्च गत्वा धूपादिकन्ददेत् ॥

प्राण प्रकृति योगन्तु ज्ञात्वा कर्म समाचरेत् ।

कुम्भात् बीजं समादाय शेषवक्त्रे तु योजयेत् ॥

बीजञ्शिवकुम्भाच्च फणमध्य स्तलिंगके ।

विघ्नेशबीजमादाय तत्स्थाने तु योजयेत् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कुम्भाद्भिरभिषिच्याथ तैलादीनि यथा क्रमम्।

146 नैवेद्यं सोपदंशन्तु | पायसापूपसंयुतम्॥ नैवेद्य

प्रियङ्गुपिष्टं मधुना ताम्बूलञ्च निवेदयेत्।

धूपदीपादिकं दत्वा मन्त्रपुष्पं ददेद्गुरुः॥

अभिषं यजमानस्य प्रार्थयेत्तदनन्तरम्। दक्षिणा

कर्ता तु प्राङ्मुखो भूत्वा आचार्यादीन्प्रपूजयेत्॥

आचार्यं गन्धपुष्पाद्यैरभ्यर्च्य च यथाविधि।

गोभूहिरण्यवस्त्रञ्च प्रतिमाञ्च सदक्षिणाम्॥

आचार्याय प्रदातव्यमभिष्टफलसिद्धये।

ऋत्विग्भ्यश्च तथा दद्यात् प्रतिमां वस्त्रसंयुतम्॥

सदक्षिणान्तु दत्वाथ जापकेभ्यश्च दक्षिणाम्।

दद्याद्वै भूरिदानञ्च यथाशक्त्यानुसारतः॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

15a अधमा पञ्च निष्का तु द्विगुणा मध्यमा भवेत् ।

त्रिगुणा चोत्तमा ज्ञेया ······ कस्य तु दक्षिणा ॥

ऋत्विक्भ्यो ज ····· भ्यश्च तदर्धार्धन्तु दक्षिणा ।

ब्राह्मणान् भोजयेत्पश्चात् ··· रुग्यान् यथामति ॥

एवं यः कुरुते शेष ··· जस्थापनमुत्तमम् । फलं

प्रति बन्धानिवृत्याथ सचिरायुरशुचिर्भवेत् ॥

वन्ध्यास्वदोष निर्मुक्ता जिवपुत्रो भवेद्ध्रुवम् ।

पूर्वोक्त विविधैः पापैर्मुच्यते नात्र संशयः ॥

न तस्य सन्ततेहानिस्सत्यं सत्यमयोदितम् ।

इहैव सकलान्भूत्वा सोन्ते साकुज्यमाप्नुयात् ॥

15b प्रतिष्ठादितमारभ्य मण्डलानां विशेषतः ।

अभिषेकञ्च नैवेद्यं ताम्बूलञ्च विशेषतः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पूपं कपित्थं मधुना मिश्रीकृत्य निवेदयेत्।

प्रत्यहं ........... द ओ श्रद्धाभक्तिसमन्वितः। नित्यपूजा

नित्यपूजां यथान्यायं कुर्यान्नैवेद्य पूर्वकम्।

एवं यः कुरुते तस्य पुत्रपौत्रादिभिस्सह॥

इहैव सकलान् भुक्त्वा सोऽन्ते सायुज्यमाप्नुयात्।

इति सिद्धान्तदीपिकायां नागप्रतिष्ठाविधि पटलः।

। शुभमस्तु। गुरुभ्यो नमः।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.